आरण्यकम् (XXII/1) मार्च 2014 ISSN 0975 - 0061
अर्धवार्षिकं संस्कृतशोधपत्रम् आर.एन.आई. सं.58951/94

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्)
   - स्व. पण्डित कमलाकान्त उपाध्यायः
   15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः)
   -श्री देवकुमार मिश्रः 'अलमस्त'
   15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा
   - श्री नर्मदेश्वर ओझा
   15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
   35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
   51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
   51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
   41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
   - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
    51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
    60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
    204 रूप्यकाणि

# आरण्यकम्

अर्धवार्षिकं संस्कृतशोधपत्रम्

संस्कृतप्रसारपरिषद्
आरा (विहारः)

संस्कृतप्रसारपरिषद्, आरा (विहारः)
सरस्वती नः सुभगा मयस्करत्

द्वाविंशं वर्षम्, प्रथमोऽङ्कः
मार्च 2014

## 'आरण्यक'स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः)मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कम् एकशतं (100) रूप्यकाणि। एकस्याङ्कस्य शुल्कम् पञ्चाशत् (50) रूप्यकाणि। शुल्कप्रेषणस्योपायाः-

   (i) **NEFT Banking**

   | | |
   |---|---|
   | Bank - | Indian Bank, Ara (Bihar) |
   | IFSC - | IDIB000A047 |
   | Name - | Sanskrit Prasara Parishad |
   | Acc. No. - | 552203784 |

   शुल्कं संप्रेष्य तस्य सन्देशसूचना (Message) अत्र देया- डॉ. नीलमणि पाठकः, दूरभाषः 09431451895

   (ii) **बैंक ड्राफ्ट 'संस्कृतप्रसारपरिषद्'** इति नाम्ना आरा (बिहार) नगरे व्यवहरणीयम्।

   **ड्राफ्ट प्रोषणस्थलम्** - डॉ. नीलमणि पाठकः, गणपति ज्वेलर्स के पीछे, महावीर स्थान, मौलाबाग, आरा (विहार)-802301

   (iii) **धनादेशः** (M.O.) डॉ. नीलमणि पाठकस्य नाम्ना।
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम्।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
8. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
9. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
10. 'आरण्यक'सम्बद्धः लेखप्रकाशनसमीक्षादिविषयकः सर्वविधपत्रव्यवहारः **प्रो. गोपबन्धु मिश्रः, अध्यक्षः, संस्कृतविभागः, काशी हिन्दू विश्व-विद्यालयः, वाराणसी-221005 इति सङ्केतेन** दूरभाषः-0542-2310561, (चलः) 09450870788 विधेयः।

    Email-gopabandhuh@gmail.com

# आरण्यकम्

**संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्**


**वर्षाङ्कौ - द्वाविंशं वर्षम्, प्रथमोऽङ्कः**

**चैत्रः, वि.सं. २०७१**

**मार्च, २०१४**

**प्रतिवर्षं प्रकाशनकालः**
**चैत्रः, आश्विनः-विक्रमाब्दः**
**मार्च, सितम्बर**

प्रत्यङ्कम् - ५० रूप्यकाणि　　वार्षिकं शुल्कं १०० रूप्यकाणि
संयुक्ताङ्कः - १०० रूप्यकाणि

**परामर्शदात्री समितिः**

डॉ. हरिहर झा, दरभङ्गा
डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ. राय अश्विनी कुमारः, बोधगया



संस्थापकः

**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

सम्पादकः

**प्रो. गोपबन्धु मिश्रः**
संस्कृतविभागाध्यक्षः
काशी हिन्दू विश्वविद्यालयः, वाराणसी
भूतपूर्वः अतिथ्यध्यापकः (संस्कृतम्)
सोर्बोन नोवेल विश्वविद्यालयः, पारिस (फ्रान्स)

सह-सम्पादकः

**डॉ. सुनीलकुमार प्रधानः**
Email-sunilkumarp435@gmail.com



प्रकाशिका

**संस्कृतप्रसारपरिषद्**
रामेश्वरलीलासदनम्
महावीरस्थानम्
मौलाबाग, आरा (विहारः) 802301

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, दी महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।


# सम्पादकीयम्

**'स्वाध्यायप्रवचनाभ्यां मा प्रमदितव्यम्'** इत्यौपनिषदं वचो न केवलम् अध्यायायापि तु स्वाध्यायाय प्रचोदयति। **'स्वं रूपं शब्दस्याशब्दसंज्ञा'** (अष्टाध्यायी 1.1.68) इति सूत्रं शब्दस्य रूपापेक्षया स्वं रूपं समधिकतयाभिव्यञ्जयति। **'स्वतन्त्रः कर्ता'** (अष्टाध्यायी 1.4.54) इति सूत्रं तन्त्रतापेक्षया स्वातन्त्र्यमेव कर्तुः लक्षणसिद्धये योजयति। **'स्वतन्त्रता अस्माकं जन्मसिद्धोऽधिकारः'** इति वाक्येन लोकमान्यो बालगङ्गाधरतिलकः भारतवर्षस्य स्वातन्त्र्यबीजमन्त्रं प्रस्तौति।

किमिदं 'स्वम्', यस्य योगमात्रेण न केवलं शब्दः नवीनं कलेवरमाधत्तेऽपि तु स नूतनं कञ्चिदर्थविशेषं व्यनक्ति? केयं 'स्वता' या न केवलं शब्दस्वरूपेण जीवत्यपि तु अनुभवविशेषं जनयित्वा सर्वानस्मान् जीवयति? किमियं स्वता या विस्तृतं व्यापकम् असीमं विषयविशेषं संकीर्णं संक्षिप्तं सीमितं च करोति। 'स्वप्नवासवदत्त'नाटके राज्ञ उदयनस्य पद्मावत्या सह पाणिग्रहणविषयिणीं ज्योतिर्विदुक्तसम्भावनां स्मृत्वा पद्मावत्याः प्रथमदर्शनकाले एव तां प्रति आत्मीयभावस्योद्गमेन बहुमानसम्पादनमनेन वचसा राज्ञः महामात्यः यौगन्धरायणः प्रस्तौति–

**प्रद्वेषो बहुमानो वा संकल्पादुपजायते।**
**भर्तृदाराभिलाषित्वादस्यां मे महती स्वता।।**

(स्वप्नवासवदत्तम्, प्रथमोऽङ्कः)

एषा पद्मावती भर्तुरुदयनस्य दारा भविष्यतीति मनोभाव एव पद्मावत्याः सामान्यस्त्र्यपेक्षया विशिष्टतां कामपि जनयति किं च तस्यां यौगन्धरायणस्य 'स्वता' उत्पद्यते। अथ च सा स्वता एव सर्वत्र संकल्पविशेषस्य हेतुर्भूत्वा कस्मिंश्चिद् वस्तुनि विषये वा विशिष्टतां जनयति। सैव स्वताजन्यसंकल्पविशिष्टता बहुमानस्य प्रीतेर्वा हेतुर्भवति। यद्यत्र स्वता नोत्पद्येत तर्हि पद्मावती 'सामान्या काचिद् राजकन्या' इति भावो मनसि उत्पद्येत, तस्यां वर्तमानो विशिष्टो मानः कथमपि नाविर्भवेत्। अतः एतस्य बहुमानस्य कृते पद्मावत्याः रूपगुणादिवैशिष्ट्यं हेतुर्न, अपि तु पद्मावत्यां

**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

यौगन्धरायणस्य 'स्वता' भावः तां विशिष्टां निर्वर्तयति, सा च विशिष्टता बहुमानस्य हेतुर्भवति। अर्थात् 'स्वता' एवाखिलवैशिष्ट्यसम्पादनस्य मूलं न तु वस्तुनः स्वरूपादि। केनचिद् दार्शनिकेनोदाहरणं दर्शयितुकामेनाभिहितं यत् कश्चिद् जनः यावत्कालं जानाति यत् 'असौ मे पुत्रः' इति, तावद् आत्मयोगकारणेन तस्मिन् प्रीतिं सम्पादयति। यदि कस्मिंश्चिद् अवसरे स जानीयात् यत् 'असौ न मे पुत्रः, अपि त्वितरस्य कस्यचिद् इति, त्वरितं स क्रुद्धो भूत्वा तमेव निरपराधं निरपेक्षं बालकं हन्तुमपि कदाचित् प्रभवति। अर्थात् 'स्व'सम्बन्धेन पुत्रः पुत्रो भवति, न तु पुत्रत्वमात्रेण। एवमेव कामिनीकाञ्चनादिविषयेऽपि आत्मीयभावकारणेनैव विशिष्टा प्रीतिरुत्पद्यते, न तु कामिनीत्वेन काञ्चनत्वेन वेति। अत एव मैत्रेयीमुद्दिश्य याज्ञवल्क्येने दमुच्यते उपनिषदि–'**न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति।**' (बृ.उ. 2.3.5)

'**स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः**' (गीता 18/45) इति '**स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः**' (गीता 18/46) इति गीतोक्तिद्वये स्वकर्मणः महत्त्वमथ च संसिद्धये तस्यैव निमित्तत्वं श्रीभगवता प्रादर्शि। किमेतत् स्वकर्म? कदा कया रीत्या वा कर्मविशेषः तत्कर्तुः स्वकर्मत्वम् अधिरोहति? किं कर्मविशेषे कर्तुः स्वत्वम् आरोप्यते उत सहजतया तत्र स्वता अनुभूयते? स्वकर्मणः परिसीमनिश्चयः केन विधिनां कर्तुं शक्यते? स्वकर्मत्यागेन कीदृशः प्रत्यवायः सम्भाव्यते? किं 'स्वकर्म' परिवर्तयितुं शक्यम्? इति नानाविधाः प्रश्नाः समुद्यन्ति।

एवमेव '**स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि**' (गीता 2/31), '**स्वधर्मे निधनं श्रेयः**' (गीता 3/35) इत्यादिषु गीतोक्तप्रसङ्गेषु स्वधर्मस्य महत्त्वं सम्यग् उपन्यस्तं विद्यते। किं कश्चिद् धर्मः सर्वसामान्यो भवति? किं स्वधर्मः इति स्वयुतो धर्मः एकस्य अपरस्मात् अवश्यमेव भिद्यते उत अनेकेषाम् एक एव धर्मः व्यक्तिशः 'स्वधर्मः' इत्याख्ययाभिहितो भवति? परस्य धर्मः यदि सुतरां धर्मपदवाच्यः स्यात् तर्हि तेन तदतिरिक्तात् 'स्व' इति गण्यमानस्य धर्मविशेषाद् अवश्यं भिद्येत। किं 'परधर्मो भयावह' इति कथनं सापेक्षिकं नास्ति? अर्थात् 'स्वधर्मः' इति कथनमात्रेण 'परधर्मः' इति विपरीतस्थितिरुत्पद्यते। यथा एकस्य कृते स्वधर्मः, तथा तदितरस्यापरस्य कृते तस्य 'स्वधर्मः' प्रथमस्य दृष्ट्या 'परधर्मः' इति विचार्यते। तथैव 'पर' इति संज्ञासंज्ञिनः कृते तस्य धर्मः 'स्वधर्मः', किं च तदितरस्य तदपेक्षया 'परस्य' वा धर्मः 'परधर्मः' इति सिद्ध्यति। अतोऽयं 'स्वधर्मः' सापेक्षिक एव। तर्हि



एतादृशस्य स्वधर्मस्य निर्णायकः कः? तस्य स्वतायाः विनिगमकं किम् इति जिज्ञासायामन्यत्र गीतायामेवोक्तम्–

**तस्माच्छास्त्रं प्रमाणं ते**

**कार्याकार्यव्यवस्थितौ।** (गीता 16/24) इति।

यद्यपि प्रत्येकं स्वधर्मः अपरस्माद् भिद्यते अथवा कदाचित् समानतामापद्यते, तथापि तत्र 'एष एव मे स्वधर्मः, नान्यः' इति धर्मे स्वताया अनुबन्धविनिश्चये तथा सारल्यं नास्ति। कदाचित् जीवनस्य अधिकांशभाक् कालः स्वधर्मविषयकं चिन्तनं विना तथा च स्वकर्मसम्बद्धं निश्चयं विना व्यत्येति। तदर्थं तस्यामेव गीतायाम् अर्जुनमुपदिशन् श्रीभगवानाह–

**सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्।** (गीता 18/48)

अत्र सहजं कर्मैव 'स्वकर्म' इत्यवेक्षणीयं प्रतिभाति। किं च स्वकर्मनिर्वृतये निष्ठया प्रवृत्तिरेव 'स्वधर्मः' इति एतेन गीताशास्त्रेणाभिव्यञ्जितमिति कथयितुं शक्यते। तद्यथात्र अर्जुनस्य क्षत्रियत्वात्–

**शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।**

**दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्॥** (गीता 18/43)

इति क्षात्रकर्म तदर्थमुपदिश्यते। अत्रापि एतस्य कर्मणः स्वभावजत्वपरिकल्पने स्वस्य भाव एव हेतुविशेषरूपेणाभिहितं विद्यते। अर्थात् स्वभावात् जायमानं स्वकर्म, स्वकर्मानुबद्धश्च स्वधर्मोऽवश्यं रक्षणीय इति सर्वत्र 'स्वतायाः' अनुयोगः तत्सम्बद्धस्य पुरुषस्य तत्तेषां भावकर्मधर्माणां वैशिष्ट्यं विनिश्चिनोति। तत्तत्स्थलेषु 'स्व' शब्दस्य प्रयोगो न भवेच्चेत् तत्र भूयसी अनवस्था अर्थानुपपत्तिर्वा उपतिष्ठेत।

'**स्वमज्ञातिधनाख्यायाम्**' (अष्टा. 1.1.35) इति सूत्रेण ज्ञातिधनान्यवाचिनः स्वशब्दस्य सर्वनामसंज्ञा प्रथमाविभक्तिबहुवचने विकल्पेन भवति, तेन स्वे-स्वाः (आत्मीया आत्मान इति वार्थः) इति पदे निष्पद्येते। इतरविभक्तिषु सर्वनामसंज्ञेय नित्या भवति, तेन स्वस्मै, स्वस्मात्, स्वेषाम्, स्वमिन् इति पदानि सिद्ध्यन्ति। उपरिविवेचितेषु स्थलेषु स्वभाव-स्वकर्म-स्वधर्म-स्वराज्येत्यादिषु ज्ञातिधनान्यवाचिनः स्वशब्दस्य समासः परिलक्ष्यते। तेन स्वशब्देन सह समासेन अपरिमिताः भावकर्मधर्मादयः सम्बद्धजनस्य आत्मना सह सन्नद्धाः भूत्वा विशिष्टतामधिरोहन्ति। किं च एतां विशिष्टतां विना कृत्याकृत्यप्रवृत्तिनिवृत्तिरूपो विवेकः न प्रवर्तते, अर्थात्

'रामादिवत् प्रवर्तितव्यं न रावणादिवद्' इत्यादिबोधनिश्चयाय रामरावणादिगताः स्वभावाः स्वकर्माणि स्वधर्मा एव प्रमाणरूपेण स्वीक्रियन्ते, न तु केवलं मानवीयभावकर्मधर्मादिरूपैः।

अतः स्वधर्मविक्षणं नामात्मनोऽन्तर्गतायाः कर्मनिष्ठायाः पर्यालोचनम्, अपरस्य कर्तव्याकर्तव्यविवेकस्यापेक्षया आत्मनः कृतक्रियमाणकरिष्यमाणानां कर्मणाम् आत्मनैव विवेचनम् इति वारं वारं तेन क्रियमाणेन स विवेकः स्वभावो भवति, तेन चात्मनः जीवनशैली उत्पद्यते तया च शैल्या आत्मनः समृद्धिस्तु भवत्येव, अपि तु तया इतरेषामपि संरक्षासुरक्षोपकाराश्च सम्भवन्ति। 'आरण्यक'स्यैष लघुः प्रयासस्तस्यामेव दिशि प्रवर्तितुकामोऽस्ति।

अङ्केऽस्मिन् स्वचिन्तनसमृद्धिसिद्धस्य फ्रांसदेशीयस्य प्राच्यतत्त्वविदः प्रो. पी-एस.फिलिओजामहोदयस्य 'अंकिल् दुपेरों' इत्याख्यस्य प्राच्यविद्यासंशोधनमार्गदर्शिनः चरितम् आश्रित्य लेखविशेषः प्रकाश्यते। एवं च न्यायवैशेषिकदर्शनम् आश्रित्य अंकितामिश्रा – डा.करुणानन्दमुखोपाध्यायोः तथा च तत्त्वविवेकमाश्रिव्य डा.सावित्रा-शतपथिवर्यायाः लेखद्वयं प्रकाश्यते। व्याकरणे नव्यत्वम् आधुनिकत्वं च इति शीर्षकमाश्रित्य रुषदेशीयायाः राधा ब्लिडंरमान इत्याख्यायाः लेखः प्रकाश्यते, तथा च डा.कुन्दनकुमारस्य मधुररसविमर्शाश्रितो लेखस्तथा च विमलतिवारिमहोदयस्य सीताया निर्भीकताश्रितोऽपरो लेखः प्रकाश्यते।

पुनरेकवारं विलम्बेन प्रकाश्यमानस्य अङ्कविशेषस्य कृते विदुषां पुरतः क्षमां संप्रार्थ्य विरम्यते।

विद्वद्वशंवदः
गोपबन्धु मिश्र
सम्पादकः, आरण्यकस्य



## सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| १. अंक्तिल् दुपेरों : प्राच्यविद्यासंशोधनमार्ग-दर्शिनः चरितम् | प्रो. पिएर-सिल्व्याँ-फिलिओजा<br>संस्कृत-एमिरिटस प्रोफेसर<br>'इन्स्टिच्यूट द फ्रांस' सदस्यः<br>१३, रियू रामब्यूतो, पेरिस | १ |
| २. रामकथाश्रितकाव्येषु वर्णिता सीताया निर्भीकता | विमल तिवारी<br>शोधच्छात्रः (यूजीसी जे.आर.एफ.)<br>संस्कृतविभागः<br>काशीहिन्दूविश्वविद्यालयः,<br>वाराणसी | ९ |
| ३. व्याकरणे नव्यत्वम् आधुनिकत्वं च | राधा ब्लिण्डरमान<br>प्राक्तनच्छात्रा (स्नातकोत्तरम्)<br>संस्कृतविभागः,<br>काशीहिन्दूविश्वविद्यालयः,<br>वाराणसी | १७ |
| ४. मधुररसविमर्शः | डॉ. कुन्दन कुमारः<br>द्वारा रामपूजन मिश्रः<br>ग्रा. बाँकीपुर गोरख<br>पत्रा. फतुहा, पटना, बिहार | २९ |
| ५. विवेकशास्त्रे तत्त्वविवेकः | डा. सावित्री शतपथी<br>आसिस्टैंट प्रोफेसर (साहित्यम्)<br>राष्ट्रियसंस्कृतसंस्थानम्<br>जम्मूपरिसरः, जम्मू | ३५ |

| विषयः | लेखकः | पृष्ठम् |
| --- | --- | --- |
| ६. न्यायवैशेषिकदर्शनप्रतिपादिते पदार्थसाधर्म्यवैधर्म्ये : प्रयोजनदृष्ट्या एका समीक्षा | अंकिता मिश्रा शोधच्छात्रा तथा च डा. करुणानन्द मुखोपाध्यायः आसिस्टैंट प्रोफेसर संस्कृतविभागः, काशीहिन्दूविश्वविद्यालयः, वाराणसी | ३९ |



# अंक्तिल् दुपेरों : प्राच्यविद्यासंशोधनमार्गदर्शिनः चरितम्

पिएर-सिल्व्याँ-फिलिओजा

1754तमे संवत्सरे प्यारिस्पुरे प्राचीनपारसीकभाषायां लिखितानि चत्वारि पत्राणि द्रष्टुमवसरो मया प्राप्तः। तानि आक्स्फोर्ड्नगरे रक्षिताद् वेन्दिदद्सदेऽभिधपुस्तकादुद्धृतपत्राणां प्रतिकृतय आसन्। तमाश्चर्यकरग्रन्थमुपार्जित्य मम मातृदेश आढ्यङ्करणीय इति झटित्यहं निश्चितवान् इत्येवं **अंक्तिल् दुपेरों ( Anquetil Duperron )** महाशयः भारतदेशयात्रानिश्चयप्रयोजनं स्वयमेव विवृतवान्। तत्समये स द्वाविंशतिवर्षवयस्क आसीत्। सः 1731तमे वर्षे प्यारिस्-नगरे लब्धजन्मा तत्रैव सोर्बोन् (Sorbonne) विश्वविद्यालये समाप्तशिक्षः होल्लन्द्-देशे आध्यात्मिकविद्याध्ययनमकरोत्। तदानीं हेब्रू-लतिन्-ग्रीक्-अरब्-पारसीकभाषा अधीतवान्। ततः प्यारिस् -नगरं प्रत्यागत्य फ्रांसीयराजपुस्तकालये पूर्वदेशीयपुस्तकानि कौशल्येन निरूपितवान्।

तत्समये पश्चिमदेशेषु इरान्-देशस्य भारतदेशस्य च अवेस्तवेदादिप्राचीनपुण्यग्रन्थविषये जिज्ञासा आसीत्। परन्तु तानि पुस्तकानि न दृष्टानि कदाचन। बहूनि संस्कृतपुस्तकानि प्यारिस् -राजपुस्तकालये विद्यन्ते स्म, न तु वेदग्रन्थाः, नापि अवेस्तग्रन्थाः। अपि च तस्मिन् काले यूरोपद्वीपे न कोऽपि विद्वान् संस्कृतवाणीं वा अवेस्तभाषां वा जानाति स्म। तत्त्वतः पुस्तकार्जनं न पर्याप्तम्। गुरोर्मुखाद्भाषाशिक्षणमपेक्ष्यते स्म। अत एव युवकः अङ्क्तिल् तन्न्यूनतां विदित्वा सहसा तीव्रोत्साहेन विश्वसाहित्यविज्ञानविषये नवीनभागस्याविष्कारं कर्तुमैच्छत्। अवेस्तधर्मानुयायिनां पुरातनानाम् इरान्–जनानां भारतदेशप्रव्रज्यां विदित्वा भारतदेशगमनस्य दृढनिश्चयमकरोत्। भारतदेशे अवेस्तग्रन्थपुराणभाषायाः संस्कृतभाषायाश्च पण्डितेभ्यः शिक्षणं तस्य दृढसंकल्पः। कतिपयाः प्रसिद्धाः प्रभविष्णवो महाविद्वांसः राजपुस्तकालये शासनसाहित्य-

विद्याप्रतिष्ठाने वा सदस्यभूताः तस्य वैदग्ध्यमौत्सुक्यं चालोच्य तमनुमोदयन्ति स्म। प्रयोजनमुदात्तं तस्यासीत्, न तु साधनानि। स्वपितृभ्यां सुहृद्भ्यः पालयितृभ्यश्च ऋणं कर्तुं नैच्छत्। अवेस्तसंस्कृताध्ययनार्थं राजनियोगं प्रार्थयते स्म। उत्तरं नाधिगतम्। कालोऽगच्छत्। स युवकस्तु न मात्रयापि कालक्षेपं सहते स्म। अनिवार्यौत्सुक्येन यौवनचापल्येन च भारतप्रेषितपत्तिसैन्ये पदातित्वेन नियोगं स्वीचकार। तत्काले फ्रांसीया अंग्लीयाश्च भारतदेशे परस्परयुद्धं सततमकुर्वत। तत्र प्रेषिता भटाः नीचतमा जातिहीनजना अभवन्। कुलजातस्य गुणिनः शिष्टस्य यूनः तादृशनियोगस्वीकारः प्रमादप्राय आसीत्। 1754तमे वत्सरे नवेम्बर् (November) मासस्य सप्तमदिवसे स्वकुटुम्बेऽपि अनिवेदिते सति प्रभाते प्यारिस्-नगरात् नीचपदातिपत्तिकायां स प्रातिष्ठत। कतिपयेषु दिवसेषु गतेषु लोरियं (Lorient) नगरं प्राप्तवान्। तत्र स्वपालयितृणामनुग्रहेण सैन्यनियोगान्मोचनं प्राप्तमभूत्। किं च सवेतनः अध्ययन-राजनियोगः राजनौकायां धनरहितयात्रा च तस्मै दत्ताः। दशमासेषु गतेषु 1755तमे वर्षे आगस्त् (August) मासस्य दशमदिवसे स पुदुचेरीनगरं प्राप्तवान्।

अष्टादशशतके फ्रांसीयजनानाम् अल्पसंख्याकगणः पुदुचेरीनगरीं तत्परिसरं च शासितवान्। ते फ्रांसीयनिवासिनः प्रायेण वणिजो भटाः राजाधिकारिणः ख्रीष्टीयमतप्रचारकाश्चासन्। कौतूहलविहीना भारतीयभाषासाहित्येषु भारतवर्षसनातनधर्मे पुरातनकलासु भारतेतिहासविषये अत्यन्तमव्युत्पन्नाः। ते धनमर्जित्वा सर्वभोगान् भुञ्जन्ति स्म। कश्चिद्युवा संस्कृतभाषाशिक्षणम् अवेस्तवेदाध्ययनं च दृढेन हृदयेनेच्छतीत्येतत् तैरधिगन्तुं न शक्यते स्म। तेषां मध्ये व्युत्पन्नो वैज्ञानिकविमर्शतत्पर आध्यामिकतत्त्व-विचारप्रवणः अंक्तिल् विलक्षणस्वभावो वैदेशिक इवाभात्। पुदुचेरीनिवासिनः फ्रांसीयजनाः व्युत्पन्नव्यवहारानुचिताः सहृदयतारिक्ता न सौहृद्यमर्हन्तीति कृत्वा स पुदुचेरीनगरान्निर्जगाम। द्राविडेषु जिञ्जीपुरं गत्वा संस्कृतोपाध्यायमन्वैच्छत्। अचिरेण तु तीव्ररोगपीडितः पुदुचेरीं प्रत्यागत्य स्वास्थ्यं प्राप्य अन्यत्रस्थानं निरणयत्। चन्द्रनगरं प्रति समुद्रमार्गेण जगाम।

चन्द्रनगरं गौडेषु अन्यत् फ्रांसीयनिवासस्थानमासीत्। गौडेषु प्रसिद्धविद्यास्थानानि नवद्वीपादीनि तदानीं विराजन्ते स्मेति श्रुतम् अंक्तिल्-महाशयेन। तत्र महाविदुषां मध्ये संस्कृतोपाध्यायो भविष्यतीति तस्य दृढाशा आसीत्। परंतु तद्देशे शान्तिर्नासीत्।



तस्यागमनादनुक्षणमेव फ्रांसीयाङ्ग्लीययोर्युद्धं प्रारभत। चन्द्रनगरे सेनाक्रमणात्प्रागेव अंक्तिल् पलायने शरणमगात्। स्तोकान्मुक्तः युद्धसंक्षुब्धदेशे एकाकी रक्षारहितः स पुदुचेरीनगरं प्रति पुनर्गमनं निश्चितवान्। तत्र विद्या नासीत् तथापि कापि शान्तिस्तावद्राजते स्म। चन्द्रनगरात् आपुदुचेरीपुरम् अद्वितीयः प्रायेण पादाभ्यां दीर्घमार्गमनुवव्राज। पौरस्त्यसमुद्रतीरे उत्कलान्ध्रादिषु बहूनि राज्यानि तुरुष्कप्रभुभिर्वा हिन्दुराजैर्वा शासितान्यासन्। तस्य विदेशिनः न कापि यात्रार्थं राजमुद्रासीत्। कदापि बलात् भुशुण्डिहस्तः कदाचिद् अतिथिसत्कारैः सीमा उत्तरति स्म। कदाचित् चोरान् कदाचित् कारुणिकजनान्मिलित्वा कदाचिद्रोगपीडितः स्वमार्गेऽभिनिर्वर्तते स्म। तथापि तस्य हृदये कौतूहलं विद्यौत्सुक्यं च वरीवृत्येते स्म। स कुशाग्रबुद्धिर्देशं यथार्थतया प्रैक्षत। अन्ततो गते संवत्सरे पुदुचेरीं प्राप। दिष्ट्या तस्मिन् समय एव तस्य पञ्चभ्रातृणामेकः तत्र आगच्छत्। अंक्तिल् द ब्रियंकूर् (Anquetil de Briancourt) नामा प्रथमतः सूरत्-नगरे श्रेष्ठित्वेन तदनन्तरं सूरत्-वाणिज्यकेन्द्रस्याध्यक्षत्वेन अधिकृतोऽभवत्। अंक्तिल् दुपरों युवकः स्वज्येष्ठभ्रातुः परिपालनं सततमभजत। स्वभ्रातरमनुसृत्य सूरत्-नगरं प्रति समुद्रमार्गेण पुदुचेरीनगरात् 1757तमवर्षे अक्टोबर् (October) मासस्य सप्तविंशदिवसे प्रातिष्ठत।

प्रथमतः स्वभ्रातरं विसृज्य अन्यस्मिन् फ्रांसीयनिवासस्थाने महेनाम्नि नाविकायात्रां स्थापयति स्म। किं च केरलेषु कोचिपुर्याः परिसरे सँत्थोमास् (Saint Thomas) परंपरायाः ख्रीष्टीयमतविषये जुयिष (Jewish) गणनिवेशनेतिहासे परिचयलाभार्थं पर्यटनमकरोत्। जुयिष्जनानां कृते दानशासनस्य प्रतिकृतिमनुवादं चोपालभत। तदनन्तरं 1758तमवत्सरादौ सूरत्-पुरीं प्रति भूमिमार्गेण प्रातिष्ठत।

पूर्वसमुद्रतीरे इव पश्चिमोदधितीरे कतिपयानि राज्यानि तत्काले उत्तरणीयानि। कर्णाटेषु इक्केरिराज्ये राजमुद्रां विना व्रजन् कस्यचिद्दुर्गस्य दौवारिकैर्निगृहीतः सन् कारागृहे निरुद्ध्यते स्म। अल्पकालानन्तरे निराशा तस्य मनोऽस्पृशत्। अनुक्षणमेव धैर्यं पुनराधृत्य सावधानेन कारागृहवातायनात् दुर्गस्य निर्माणाकारौ निरैक्षत। कथंचिन्मुक्तः महाराष्ट्रेषु प्रविश्य औरङ्गाबाद्-नगरं प्राप्य युवानं फ्रांसीयसेनापतिं 'जंतिं' (Capitaine Gentil) मिलितवान्। तयोः सौहृद्यदृढबन्धः ग्रथ्यते स्म। विद्वान् सेनापतिसमर्पितपर्यङ्कम् (Palanquin) आरुह्य एल्लूर (Ellora) ग्रामं गत्वा

पुरातनखातदेवमन्दिराणि प्रसिद्धतमं कैलासनाथदेवस्थानं चावालोकत। विस्मयभावेन वैज्ञानिकाशयेन च युगपत्तानि निरैक्षत। पूर्वं तस्मिन् प्रसिद्धे पुण्यक्षेत्रे बहवो विदेशियात्रिका आगत्य स्वानुभूतिनिरूपणं चक्रुः। अंक्तिल् दुपेरों विद्वान् इदंप्रथमतया सविस्तरं निरूपणमकरोत्। क्षेत्रं निरीक्ष्य सर्वदेवालयान् गत्वा स्तम्भादिसंख्यागणनं कृत्वा समस्तमन्दिराणि स्वयष्ट्या परिमित्य परिमाणानि स्मृत्वा आलेख्यानि अकरोत्। अपि च तत्र द्वाभ्यां ब्राह्मणाभ्यां सहितः नानाप्रतिमानां निरूपणं श्रुत्वा बहूनां देवानां नामरूपाणि लेख्ये न्यस्यति स्म। तत्सर्वं पश्चात्प्रकाशितमभवत्। तत्र बहवो नामविपर्यासाः। तौ ब्राह्मणौ वैष्णवौ भूत्वा वैष्णवदेवतानामेव नामानि सूचितवन्तौ। लिङ्गोद्भवमूर्तिस्थाने नरसिंहावतारनाम प्रादाताम्। तौ आत्मभ्यामज्ञातासु बौद्धप्रतिमासु वैष्णवमूर्तीरिवाभ्यजानीताम्। कतिपयेषु बौद्धेषु खातमन्दिरेषु प्रवेशनं न स्वीकृतवन्तौ, यस्मात् तत्र चर्मकारादिनीचजातिजनानां देवतार्चनम् अनुष्ठीयते स्म। अंक्तिल् तु तत्र प्रवेष्टुं न मनागपि शशङ्के। तदनन्तरं पुरातनदौलतबदुपाह्वदेवगिरिदुर्गम् औरङ्गजेबमुघल्-संराजः समाधिस्मारकमन्दिरं च दृष्ट्वा अन्ततः 1758तमे वर्षे मै (May) मासस्य प्रथमे दिवसे गुजरिषु सूरत्-नगरं प्राप। आभारतदेशप्राप्तेः त्रीणि वर्षाणि गतानि आसन्। स उत्साही विद्यालुब्धो यात्रिकस्तदानीमपि स्वोद्देशादतिदूरं तस्थौ। अवेस्तभाषाया उपाध्यायो न प्राप्तः, नापि संस्कृतस्य। पुराकाले इरान्-देशादुदस्ताः भारतवर्षे शरणार्थमागताः पारसीकाः सूरत्-नगरे निवासं भेजुः। अवेस्तपुण्यग्रन्थपाठिनः तद्ग्रन्थपुरातनभाषायां मध्यकालीनपह्लवीभाषायाम् आधुनिकपारसिकभाषायां च पण्डिता दस्तुर्नामधरा आसन्। तेषां मध्ये द्वौ पक्षौ स्तः। सप्तदशशतके कश्चित्पारसीकविद्वान् इरान्-स्थकिर्मन्-नगरादागतोऽर्चनोत्सवादिविधौ स्वसंप्रदायप्रयोगमुपदिष्टवान्। सूरत्निवासिपारसीकानां भागः तत्प्रयोगानुसरणं स्वीकृतवान्। अपरो भागः सूरत्पुरातनक्रमान् यथावद्रक्षितवान्। तयोः पक्षयोर्विवादा अनुषङ्गेण आपद्यन्ते स्म। अंक्तिल् महाशयः प्रतिपक्षे दस्तुरुपाध्यायं स्वीकृतवान्। एको मन्शेर्जी-नामा सूरत्-प्रयोगरक्षकपक्षे, अपरो दरब्-नामकः किर्मन्-प्रयोगपक्षे। उभौ पारसीमतानुयायिनौ पूजनीयौ अवेस्तपह्लवीसाहित्ययोर्महाविद्वांसौ।

तयोः शिष्यः अंक्तिल् स्वभावेन कलहप्रियः। अपि च फ्रांसीयशिष्यभारतीयोपाध्याययोः शिक्षणपद्धतिविषये भेद आसीत्। पाश्चात्यनरस्य प्रयोजनं पुस्तकपठनेऽर्थावगतौ



च कौशल्यलाभमात्रमासीत्। उपाध्यायस्य तूद्देशो धर्मानुयायिनः कृते विद्याप्रतिपादनम्। क्व पुस्तकार्जनं लिपिव्याकरणशब्दकोशानां प्रतिपत्तिं चिकीर्षुः फ्रांसीययुवकः, क्व च पारसीमतप्रचारिष्णुः पुस्तकान्यसेवित्वा शिक्षणशीलो वृद्ध आदरणीय उपाध्यायः? त्रयाणां संबन्धः कष्टसाध्यः। तथापि त्रयाणां विद्यानुरागः। अन्ततः शीघ्रम् अंक्तिल् विशेषतो दस्तुर्दरब्सकाशाद्भाषां प्रतिपद्यते स्म। स पारसीपुस्तकशतद्वयम् अर्जित्वा मुख्यानामवेस्तग्रन्थानां फ्रांसीयभाषायामनुवादमकरोत्। स चरितार्थः। दस्तुरुपाध्यायश्च स्वशिष्यस्य कुशाग्रबुद्धिम् अर्थग्रहणशक्तिं च दृष्ट्वा तुष्टः सन् तमभिनन्दयते स्म। 1760तमे जुन् (June) मासस्य विंशे दिवसे पारसीकपुण्यतमाग्निमन्दिरे तं प्रवेशयितुं स्वीकृत्य तत्र तम् अनयत्। तदा स्वभारतयात्रोद्देशस्य अवेस्तविद्याप्रतिपभूत-प्रथमभागं परिनिष्ठितम् आलोच्य संस्कृतवेदादिविद्याप्रतिपत्तिभूतद्वितीयभागं साधयितुं यत्नं प्रारभत। परंतु दुर्दैवम् आविर्बभूव।

तस्मिन् काले सूरत्-पुर्यां न कदापि शान्तिरासीत्। फ्रांसीया अङ्ग्लीयास्तुरुष्काः पारसीकाः सर्वे सततं संप्रजह्रुः। अन्ततोऽङ्ग्लीया विजयिनो भूत्वा स्वशासनमुपदधुः। सततयुद्धव्यवस्थायां लोकयात्रा दुष्करा। अंक्तिल् अल्पधनोऽसकृद्रोगपीडितोऽपि स्वभ्रातुरुपकारेण स्वधैर्येण च अध्ययनतत्परः कथंचित् स्वप्रयोजनं महत्प्रयासेन साधयति स्म। परंतु 1759तमे वत्सरे कस्मैचित् फ्रांसीयवणिजे कापटव्यवहारमाक्षिपन् तेन क्रुद्धेनभिक्रान्तः खड्गेन युद्ध्वा तमवधीत्। व्रणितः मुख्यापराधकारणाद् अङ्ग्लीयशासकाज्ञया धृतः। यदा परावस्कन्दनं प्रमाणितं, तदा बन्धनान्मुक्तः। 1760तमे वर्षे मुम्बैयात्रावसरे तन्नगरपरिसरे जोगेश्वरी-मण्डपेश्वर-कन्हेरि-एलेफन्त-पुण्यक्षेत्राणां निरीक्षणमकरोत्। कन्हेरि-क्षेत्रे कस्मिंश्चित् बौद्धखातालये पुरातनलिखित-शासनस्य स्वहस्तेन प्रतिकृतिमङ्कितवान्। सूरत्-पुरं संस्कृताध्ययनं संकल्प्य प्रत्यागच्छत्। 1761तमे वर्षे जनवरी (January) मासे पुदुचेरिनगरम् अङ्ग्लीयैः पराभूतम्। आक्रमणात्पश्चात् सूरत्-पुर्यामपि सर्वेषां फ्रांसीयजनानां दुर्व्यवस्थाभवत्। निर्धनो निरुपकारोऽङ्क्तिल् स्वमातृदेशं प्रत्यागमनं निश्चितवान्। मार्च (March) मासस्य पञ्चदशदिवसेऽङ्ग्लीयनौकायाम् अन्यैः फ्रांसीयबन्धनस्थसैनिकैः सह प्रातिष्ठत। 1761तमे वर्षे जून्मासस्य षष्ठदिवसे नौकायां आत्लन्तिक्समुद्रे प्लवमानायां सूर्यशुक्रयोः समागमः समपद्यत। समागमे सूर्यमण्डले शुक्रस्य संक्रमणं कतिपयेभ्यो

भूगोलस्थलेभ्यः प्रेक्षकैर्दृश्यते। यदि तेषु स्थलेषु संक्रमणस्य प्रमितिर्ज्ञायते, तर्हि सूर्यावनतेः सूर्यभूम्योरन्तरस्य च गणनं कर्तुं शक्यते। केचित् ज्योतिषिणः फ्रांसीयांग्लीयादयः नानादेशेषु अतिदूरं प्रेषिताः। किन्तु तत्संक्रमणसमये सूर्यमण्डलो मेघैराच्छन्नः। तेषां महाप्रयासस्य निष्फलतासीत्। केवलम् अंक्तिल् विद्वान् ज्योतिषेऽपि विशारद आकाशे मेघरहिते सति सम्यक्प्रेक्ष्य संक्रमणस्य कालं ममे। स्थानं 84° देशान्तरांशके 5°21′ अक्षभागे आसीत्। संक्रमणं सूर्यमण्डलस्य पादत्रये समपद्यत। मण्डलप्रवेशः 12 वादनेषु 5 निमेषेषु, 14 वादनेषु 45 निमेषेषु मण्डलान्निर्गमनम्। तत्स्थाने संक्रमणस्य कालः चत्वारिंशन्निमेषाः। अन्या प्रमितयो न केनापि कृताः।

समुद्रदस्युझञ्झावाताद्यपायाभिमुखाया नौकायात्राया अन्ते अङ्ग्लीयदेशेऽवरुह्य प्रथमतो बन्दित्वेन अङ्ग्लीयसैनिकाधिकारिभिरालोचितः। ततोऽचिरेण बन्धनान्मुक्तः सन् अक्स्फोर्ड्नगरं गत्वा तत्र रक्षितान् अवेस्तसाहित्यकोशान् प्रेक्षितवान्। तत्रस्थाङ्ग्लीयविदुषां कृते समीचीनतरान् अवेस्तपह्लवीपारसीकपुस्तकानां पाठान् प्रादर्शयत्। अन्ततः 1762तमे वर्षे मार्च् मासस्य चतुर्दशदिवसे सायंकाले प्यारिस्-नगरं प्राप्तवान्। अग्रिमे दिवसे प्रातः फ्रांसीयराजपुस्तकालयं गत्वा स्वार्जितावेस्तादिकोशान् तत्र न्यस्तवान्। तदनन्तरं फ्रांसीये शासनसाहित्यविद्याप्रतिष्ठाने स्वयात्रां निवेदयामास। स सर्वैर्विद्वद्भिरभिनन्दितः सन् अघोषयत्–भारतदेशे मन्निवासस्य षड्वर्षेषु गतेषु मन्मातृदेशं प्रत्यागत्य निर्धनो भवामि। परंतु अमूल्येषु पुराणेषु कोषेषु प्राच्यविद्यायाम् आढ्योऽस्मि। यौवनं मे अस्ति, तद्विद्याप्रचारार्थं दीर्घजीवनकाल उपलभ्यते। न विद्याया ऋते अन्यधनं भारतवर्षे मया लब्धमिति।

तथापि स न पूर्णया संतुष्ट्या चरितार्थः। स्वसंकल्पितोद्देशस्य केवलमर्धभागः समाप्त आसीत्। संस्कृतविद्यालाभभूतः अपरो भागः असिद्धः।

स न कदापि भारतं पुनर्गन्तुमशक्नोत्। प्यारिस्-पुर्यां राजपुस्तकालये प्राच्यपुस्तकानां रक्षणाध्ययनयोराध्यक्षत्वेऽधिकृतः। किं च शासनसाहित्यविद्याप्रतिष्ठाने सदस्यत्वेन निर्वाचितः। 1771तमे संवत्सरे पारसीकानां जेन्दवेस्त (Zend Avesta) नाम्नः पुराणपुण्यग्रन्थस्य फ्रांसीयभाषायामनुवादः तेन प्रकाशितः। तत्प्रथमभागत्वेन स्वभारतदेशयात्रानिवेदनं सविस्तरेण कृतम्। अन्येषु स्वरचितेषु पुस्तकेषु भारतदेशस्य



दुर्व्यवस्थितिं संपत्क्षयं च निरूपयामास। स्वार्थमेवोद्दिश्य वाणिज्यापदेशेन देशद्रोहिणो विदेशिनो निनिन्द। प्राच्यधर्म इत्याख्यपुस्तकं भारतीयजनेभ्यः समर्पितवान्-- "धर्मस्य वाक् न श्रुता। हे मन्दभाग्या भारतीयजनाः, अपि नाम भवन्तो जानन्ति यत् शतकद्वये एक एव यूरोपीयो नरो भवतः प्रेक्ष्य भवतां मध्ये लोकयात्रां कृत्वा इदानीं भवतां कृते धाष्ट्र्येन संभाषते तथा जगतो न्यायलये भवतां क्षतान् अधिकरान् नीचलोभेन दूषितान्मानवाधिकारान् प्रदर्शयती"ति।

1775तमे संवत्सरे अंक्तिल् स्वसुहृदः 'जंति' (Colonel Gentil) सकाशात् अर्वाचीनपारसीक-भाषायामनुदितोपनिषत्संग्रहस्य कोशं स्वीकृतवान्। तदादरणीयग्रन्थः दुर्भाग्येन औरङ्गजेब्स्वभ्रातृहतेन दारशुकोहेन विरचितः। तत्संग्रहे पञ्चाशदुपनिषद उपलभ्यन्ते। पारसिकानुवादः नाक्षरशः कृतः। शंकरानन्दगिर्यादिव्याख्यानोद्धृत-विवरणभागाः मूलस्यानुवादे तत्र तत्र प्रक्षिप्यन्ते स्म। दिल्लीनगरे मन्जिल्-इ-निगमबोधनामधरे स्वप्रासादे दारशुकोहेन महात्मविदुषा ब्राह्मणपण्डिता वाराणसीत आमन्त्रिताः। तैः सह सूफिविदुषां संवादा आचरिताः। दारशुकोहेन अद्वैतवादमनुमत्य संस्कृतभाषायां समुद्रसंगमोपाह्वग्रन्थः पारसिकभाषायां चोपनिषदामनुवादो विरचितः। तदेव माहात्म्यान्वितं ग्रन्थरत्नं अंक्तिल् विदुषो हस्तयोरागतम्। सः अंक्तिल् महात्मविद्वान् दारशुकोहसूफिविदुषा ब्राह्मणैरद्वैतवादिभिः सह सामरस्यमन्वभूत्। अनुक्षणमेव फ्रांसीयभाषायामनुवादं कर्तुं निश्चितवान्। तन्महत्कार्यं 1787तमे वत्सरे जुलै (July) मासे समाप्तम्। अथापि अंक्तिल् विद्वान् तेन संतुष्टो नाभवत्। फ्रांसीसभाषायां पारसिकमूलग्रन्थस्य पदक्रमस्य रक्षणमसंभवमभवत्। परंतु विदुषो मनसि मूलग्रन्थे आदरातिशय आसीत्। अत एव लतिन्-भाषायां पदक्रमो रक्षितुम् शक्यत इति कृत्वा लतिन्भाषायाम् अनुवादरचनं प्रारभत।

अत्रान्तरे 1789तमे वत्सरे फ्रांस्-देशे महाक्रान्तिरापद्यत। सर्वेषु राष्ट्रियसंस्थानेषु नवीनं प्रजाप्रभुत्वं प्रति सत्यसंधत्वप्रतिज्ञा (oath of faithfulness) आज्ञापिता। राष्ट्रियपुस्तकालयस्याधिकारी अंक्तिल् तत्प्रतिक्षिप्य स्वाधिकाराद् विसर्जितः। शासनसाहित्यप्रतिष्ठानं निवर्तितम्। तदानीं निर्धनः निर्जीविकः सन् कथं जीवरक्षा ग्रन्थरचनं च तेन विधीयते स्मेति न ज्ञातम्। 1793तमेवर्षे आततायिशासनकाले गृहीतः भयंकरे बन्धनगृहे नीतश्च। अचिरेण कथमपि मुक्तः सन् स जगद्व्यवहारादत्यन्तं

विरक्तः मौनमाश्रित्य संन्यासीव अज्ञातवासे तिरोभूत इव। तस्मिन् दुर्व्यवस्थितावपि स उपनिषदां लतिन्-अनुवादं रचितवान्। स लिखितवान्–"एकाकी एकान्तेन स्वतन्त्रः मदिन्द्रियाणि प्रति घोरयुद्धं कुर्वन्नहं जगतो मनोहरविषयानाक्षिपामि, विश्वाकर्षकरूपाणि निःशेषतः पराभवामि। परमेश्वरं प्रति अविछिन्नव्रज्यायां निरुच्छ्वसोऽहं प्रोत्साहेन परां गतिमिच्छामी"ति।

उपनिषदां लतिन्-अनुवादः टिप्पणीसहितः द्वयोः स्थूलपुस्तकयोः 1801-1802तमसंवत्सरयोः प्रकाशितः। 1803तमवर्षे शासनसाहित्यप्रतिष्ठानं नपोलेवोंबोनपर्त् (Napoleon Bonaparte) महाशासकेन पुनः प्रस्थापितं समायोजितं चासीत्। अंक्तिल् विदुषे तत्र सदस्याधिकारः पुनः समर्पितः। तत्समये वृद्धवयस्को विरक्तः संस्कृतग्रन्थविमर्शे अद्वैतवादविषये विचारे तत्परः 'सेन्' (Seine) नदीतीरे संन्यासीति आत्मानं प्राख्यापयत्। 1804तमे वर्षे नपोलेवोंबोनपर्त् संराज्यं प्राप्य आत्मानं प्रति सत्यसंधताप्रतिज्ञां पुनराज्ञामदात्। अंक्तिल् महात्मना पुनर्न तत् स्वीकृतम्। स संराज्यमुद्दिश्य शासनसाहित्यप्रतिष्ठानात् त्यागपत्रं लिखितवान्–"य आत्मा मे देवेन दत्तः स महान् स्वतन्त्रश्च। अत एव मत्तुल्यनरं प्रति सत्यसंधताप्रतिज्ञया न विनमिष्यामि नात्मानं भन्त्स्यामि। सत्यसंधताप्रतिज्ञा परमेश्वरायैव दातव्या सृष्टनरेण स्त्रष्ट्र एव। नरेण नराय सा प्रतिज्ञा दास्यवृत्तितुल्या। मद्भारतीयप्रज्ञया न तत् स्वीकर्तुं शक्यत" इति।

तत्पत्रं तस्य चरमोपदेश आसीत्। 1805तमे संवत्सरे जन्वरि (January) मासस्य एकोनविंशदिवसे स दिवं गतः।

❖



# रामकथाश्रितकाव्येषु वर्णिता सीताया निर्भीकता

विमलतिवारी

संस्कृतसाहित्यस्यारुणोदये आदिकविर्महर्षिवाल्मीकिः कमनीयकाव्यकलाऽलङ्कृतं रामायणाख्यं महाकाव्यमरचयत्। महाकाव्येस्मिन् रामो नायकस्सीता च नायिका। जगतोऽस्य पतिव्रतासु स्त्रीषु पतिपरायणायास्सीतायास्स्थानं महत्त्वपूर्णं वर्तते। रामायणमहाकाव्ये तदाश्रित्य विरचितेषु परवर्तिषु काव्येषु च वर्णितेषु समस्तेष्वपि स्त्रीचरितेषु सीताचरितं मुख्यत्वं बिभर्ति। सीताचरिते कविभिरुपनिबध्यन्ते बहवो गुणाः। गुणेष्वेतेषु भगवत्याः सीतायाः निर्भयत्वं राराजते। निर्भयत्वमिति शब्दः निर् उपसर्गपूर्वकाद् 'भी' भये धातोः भावे अच् प्रत्यये कृते 'निर्भय' इति शब्दे निष्पन्ने ततो भावे त्वप्रत्यये कृते सति निष्पद्यते। निर्भयो नाम 'निर्गतः भयः यस्य सः' भयरहितः निर्भीको वा, अर्थात् प्रतिकूलपरिस्थितिं विचिन्त्य हृदये यस्य भयभावना नोत्पद्यते स एवोच्यते निर्भय इति। सीताया जीवनं विपत्तिपूर्णमित्यस्माभिर्ज्ञायत एव। सा स्वकीये विपत्तिपूर्णे जीवने कदापि भीता न सञ्जाता, परित्यागप्रसङ्ग इयं लक्ष्मणं सम्बोध्याकथयत्। तद्यथा–

**मामिकेयं तनुर्नूनं सृष्टा दुःखाय लक्ष्मण।**
**धात्रा यस्यास्तथा मेऽद्य दुःखमूर्तिः प्रदृश्यते॥** वा.रा.उ.48/3

स्वकीये दुःखपूर्णे जीवने सीतया प्रतिपदं विवेकेन धैर्येण निर्भयत्वेन च व्यवह्रियते। वनप्रस्थानकाले रामो निर्दिशति यत्, सीताऽयोध्यायामेव तिष्ठेत्, प्रसङ्गेऽस्मिन्नोजःपूर्णवाक्यैरुच्यतेऽनया–

**यदि त्वं प्रस्थितो दुर्गं वनमद्यैव राघव।**
**अग्रतस्ते गमिष्यामि मृद्नन्ती कुशकण्टकान्॥** वा.रा.अयो.27/7

कथ्यतेऽनया यदि भवताऽद्यैव दुर्गं वनं प्रस्थीयते तर्हि, भवतोऽग्रेऽग्रे कुशकण्टकान् मृद्नन्ती गमिष्यामीति। सीताऽत्र वने सम्भावितानि दुःखान्यविचार्य

निर्भयत्वेन वनं जिगमिषति। अस्या निर्भयताया आधारः कः? इति प्रश्नः चेत्, विषयेऽस्मिन् तयैव कथ्यते–

**सुखं वने निवत्स्यामि यथैव भवने पितुः।**

**अचिन्तयन्ती त्रींल्लोकांश्चिन्तयन्ती पतिव्रतम्।।** वा.रा.अयो.27/12

श्लोकेऽस्मिन् ज्ञायते स्पष्टरूपेण यत् भगवती पातिव्रत्यबलेन वनं गन्तुमुद्यता वर्तते। तस्या मनसि पतिव्रतमाधारीकृत्य कश्चनापूर्वः विश्वासातिरेकः परिलक्ष्यते। अस्या निर्भयत्वन्तु वनवासवृत्तान्ते प्रस्फुटति। यस्य रावणस्य नामैव श्रुत्वा देवाः पलायन्ते, कथं तेन सह सीतया व्यवह्रियते–

**येन वित्रासिता लोकाः सदेवासुरमानुषाः।**

**अहं स रावणो नाम सीते रक्षोगणेश्वरः।।** वा.रा.अरण्य 47/26

सीता रक्षसस्तस्योन्मुखीभूय ओजःपरिपूर्णेन स्वरविशेषेण रामस्यातुलनीयं पराक्रमं विवृत्य रावणं भर्त्सयति। तद्यथा–

**रावणेनैवमुक्ता तु कुपिता जनकात्मजा।**

**प्रत्युवाचानवद्याङ्गी तमनादृत्य राक्षसम्।।** वा.रा.अरण्य 47/32

**महागिरिमिवाकम्प्य महेन्द्रसदृशं पतिम्।**

**महोदधिमिवाक्षोभ्यमहं राममनुव्रता।** वा.रा.अरण्य 47/33

**त्वं पुनर्जम्बूकः सिंहीं मामिहेच्छसि दुर्लभाम्।**

**नाहं शक्या त्वया स्प्रष्टुमादित्यस्य प्रभा यथा।** वा.रा.अर.47/37

**सूर्याचन्द्रमसौ चोभौ पाणिभ्यां हर्तुमिच्छसि।** वा.रा.अरण्य 47/42

**यो रामस्य प्रियां भार्यां प्रधर्षयितुमिच्छसि।।**

**अग्निं प्रज्वलितं दृष्ट्वा वस्त्रेणाहर्तुमिच्छसि।** वा.रा.अरण्य 47/43

**कल्याणवृत्तां यो भार्यां रामस्याहर्तुमिच्छसि।।**

**अयोमुखानां शूलानामग्रे चरितुमिच्छसि।**

**रामस्य सदृशीं भार्यां योऽधिगन्तुमिच्छसि।।** वा.रा.अरण्य 47/44

अनेन शिक्षणीयमेतद् यदन्यायस्य विरोधः निर्भयत्वेन करणीयः, तथा प्रतिकूलपरिस्थितौ स्त्री भयभीता न भवेदिति। भगवती सीता स्वकीये पातिव्रत्ये रामस्य च पराक्रमे विश्वसिति। अशोकवनिकायां भयङ्कर‌राक्षसीनामधीनाऽपि सा परुषवाक्यैः श्रीरामं प्रत्यनुरागं प्रदर्श्य राक्षसराजमुवाच–इक्ष्वाकुवंशप्रभवो रामो लक्ष्मणेन सह ते



प्राणान् वधिष्यति। निशाचर! त्वं सुरैरसुरैर्वाऽवध्यः स्या नाम, परन्तु रामेण सह सुमहद्वैरमुत्पाद्य प्राणधारणं ते दुष्करमिति। तद्यथा–

**इक्ष्वाकूणां कुले जातः सिंहस्कन्धो महाद्युतिः।**

**लक्ष्मणेन सह भ्राता यस्ते प्राणान् वधिष्यति।।** वा.रा.अर.56/04

**असुरैर्वा सुरैर्वा त्वं यद्यवध्योऽसि रावण।**

**उत्पाद्य सुमहद्वैरं जीवं तस्य न मोक्ष्यसे।।** वा.रा.अर.56/08

अत्रापि सीताया निर्भयताया आधारस्तस्याः पातिव्रत्यं रामस्य च वीरत्वं सिध्यति, सन्दर्भेऽस्मिन् सीतयैव कथ्यते– धर्मपरायणस्याहं भगवतो रामस्य धर्मपत्न्यस्मि, दृढत्वेन पातिव्रत्यं पालयामि राक्षसाधम! त्वयाहं स्प्रष्टुमपि न शक्येति। तद्यथा–

**तथाऽहं धर्मनित्यस्य धर्मपत्नी दृढव्रता।**

**त्वया स्प्रष्टुं न शक्याहं राक्षसाधम पापिना।** वा.रा.अर.56/19

सीता वीराणां कृते वीरोचितकार्यं समर्थयति, अशोकवनिकायां हनुमता कथ्यते यदनिन्दिते! मम पृष्ठमुपारोह, त्वामद्यैवास्माद् दुःखाद् सराक्षसात् मोचयिष्यामि, तदा तयोच्यते–

**यदि रामो दशग्रीवमिह हत्वा सराक्षसम्।**

**मामितो गृह्य गच्छेत तत् तस्य सदृशं भवेत्।।** वा.रा.अर.37/64

अग्निपरीक्षाप्रसङ्गे रामस्य चेतसि संदेहे समुत्पन्ने सति सीता निर्भयत्वेन सर्वान् जनान् विश्वासयितुमग्निदेवमोजसा सम्बोध्याकथयत्। तद्यथा–

**यथा मे हृदयं नित्यं नापसर्पति राघवात्।**

**तथा लोकस्य साक्षी मां सर्वतः पातु पावकः।।** वा.रा.अर.116/25

**यथा मां शुद्धचारित्रां दुष्टां जानाति राघवः।**

**तथा लोकस्य साक्षी मां सर्वतः पातु पावकः।।** वा.रा.अर.116/26

**कर्मणा मनसा वाचा यथा नातिचराम्यहम्।**

**राघवं सर्वधर्मज्ञं तथा मां पातु पावकः।।** वा.रा.अर.116/27

अत्रापि सीता स्वकीयेन पातिव्रत्येन भीता न दृश्यत इति।

परित्यागप्रसङ्गेऽपि सीता न पुनः भयेन अपितु पतिवियोगेन दुःखिता आसीत्। सा धैर्येण निर्भयत्वेन च रामाज्ञामनुपालयितुं लक्ष्मणमादिशति। तद्यथा–

**यथाज्ञं कुरु सौमित्रे त्यज मां दुःखभागिनीम्।**
**निदेशे स्थीयतां राज्ञः श्रृणु चेदं वचो मम॥**
वा.रा.उत्तर18/9

अत्र भगवती अत्यन्तं विश्वस्ताऽस्ति स्वरक्षणविषये। मांसभक्षिभिः पशुभिः समाक्रान्ते वने परित्यक्तापि सा आत्मानमसुरक्षितां न मन्यते। स्वरक्षणविषयकः कश्चन अपूर्वः विश्वासोऽत्र स्पष्टं परिलक्ष्यते।

**वक्तव्यं चैव नृपतिर्धर्मेण सुसमाहितः॥** वा.रा.उत्तर 48/14
**यथा भ्रातृषु वर्तेथास्तथा पौरेषु नित्यदा।**
**परमो ह्येष धर्मस्ते तस्मात्कीर्तिरनुत्तमा॥** वा.रा.उत्तर 48/15

अस्याः पातालप्रवेशप्रसङ्गेऽप्युदाहरणं निर्भयतायाः प्राप्यते। अग्निपरीक्षासदृशमत्रापि तस्याः पातिव्रत्यं मुख्यत्वेन प्रस्फुटति। तद्यथा–

**यथाहं राघवादन्यं मनसापि न चिन्तये।**
**तथा मे माधवी देवी विवरं दातुमर्हति॥** वा.रा.उ/97/14
**मनसा कर्मणा वाचा यथा रामं समर्चये।**
**तथा मे माधवी देवी विवरं दातुमर्हति॥** वा.रा.उ/97/15
**यथैतत्सत्यमुक्तं मे वेद्मि रामात्परं न च॥**
**तथा मे माधवी देवी विवरं दातुमर्हति॥** उ.97/16

रामकथाश्रितः प्रथमो ग्रन्थो महर्षिवाल्मीकिकृतं रामायणं वर्तते। न केवलं तस्मिन्नेव ग्रन्थे एवापितु रामकथाश्रितेषु परिवर्तिषु काव्येष्वपि सीताया निर्भयत्वं कविभिरुपनिबद्धम्। महाकविभासविरचिते प्रतिमानाटके वनवासगमनसमये सीता कथयति–यन्नु सहधर्मचारिणी खल्वहम्। अतोऽनुगच्छामि, वनं मे प्रासादः। सीतायाः वनगमनं लक्ष्मणेनापि समर्थ्यते। तद्यथा–

**अनुचरति शशाङ्कं राहुदोषेऽपि तारा**
**पतति च वनवृक्षे याति भूमिं लता च।**
**त्यजति न च करेणुः पङ्कलग्नं गजेन्द्रं,**
**व्रजतु चरतु धर्मं भर्तृनाथा हि नार्यः॥**
प्र.ना.1/25

अत्र भगवत्या 'सहधर्मचारिणी' इत्यस्य पदस्य प्रयोगः विहितः। अनेन तस्याः कश्चन अतिविशिष्टः स्वभावः स्थानञ्च प्रकाश्यते।



महाकविकालिदासविरचिते रघुवंशे पातालप्रवेशवर्णने महर्षिवाल्मीकिः रामचन्द्रमकथयत्। तद्यथा–

**स तावाख्याय रामाय मैथिलेयौ तदात्मजौ।**
**कविः कारुणिको वव्रे सीताया सम्परिग्रहम्॥**
रघु.15/11

आदिकविः कारुणिको वाल्मीकिः रामं तौ मैथिलेयौ तवात्मजाविति कथयित्वा सीतायास्स्वीकरणं ययाचे।

**तात! शुद्धा समक्षं नः स्नुषा ते जातवेदसि।**
**दौरात्म्याद्रक्षसस्तां तु नात्रत्याः श्रद्दधुः प्रजाः॥**
रघु.15/72

हे तात! ते स्नुषा सीता अस्माकं समक्षमग्नौ शुद्धा, नास्माकमविश्वास इत्यर्थः। किन्तु रक्षसो रावणस्य दुष्टतां विचार्य प्रजास्तां न विशश्वसुरिति।

**ताः स्वचारित्र्यमुद्दिश्य प्रत्याययतु मैथिली।**
**ततः पुत्रवतीमेनां प्रतिपत्स्ये त्वदाज्ञया॥**
रघु.15/73

रामस्येदं वचः श्रुत्वा सीता भूमिं प्रति वदति–

**वाङ्मनःकर्मभिः पत्यौ व्यभिचारो यथा न मे।**
**तथा विश्वम्भरे देवि मामन्तर्धातुमर्हसि॥**
रघु.15/81

तज्जनयित्री भगवती वसुन्धरा तद्वचनानि श्रृणोति सावधानतया। तस्यै स्वाङ्के स्थानं ददाति–

**सा सीतामङ्कमारोप्य भर्तृप्रणिहितेक्षणाम्।**
**मा मेति व्याहरत्येव तस्मिन्पातालमभ्यगात्॥**
रघु.15/84

अनेन पतिव्रतविषयकः भगवत्याः विश्वासातिरेकः सत्यतया प्रतिष्ठाप्यते।

बालरामायणेऽपि महाकविना राजशेखरेण वर्णितं यद् यदा रामः पितुरादेशात् वनं गच्छति, तदा सीताया मनसि अपि वनगमनोत्साहो दृश्यते। तद्यथा–

**किं तातेन नरेन्द्रशेखरशिखलीढाग्रपादेन मे**
**किं वा मे भवसुरेण वासवसभासिंहासनार्द्धासिना।**

उद्देशा गिरयश्च ते वनमही सा चैव मे वल्लभा
कौशल्यातनयस्य यत्र चरणौ वन्दे च नन्दामि च॥

बाल.रा.6/19

श्लोकेनानेन ज्ञायते यत्, पातिव्रत्यमाधारीकृत्य सा वनं गन्तुमुद्यता वर्तते। महाकविना आचार्यरेवाप्रसादद्विवेदिना उत्तरसीताचरिते सीतापरित्यागप्रसङ्गे वर्ण्यते। गुप्तचरमुखेन सीताविषयकं लोकापवादं श्रुत्वा रामस्य स्थितिः कविना एवमुपवर्ण्यते–

**निशम्य दूतेन निवेदिताक्षरं प्रियातिरस्कारं वचोविषम्।**
**घनायसाघातमवाप्य वारिभूर्यथा विदीर्णो बत सोऽपि मूर्च्छितः॥**

उ.सी.च.2/21

भगवतो रामस्य कमलमिव हृदयं दूतकथितेन प्रियातिरस्कारमयेन विषतुल्यवाण्या विदीर्णं जातम्। यथा घनायसाघातमवाप्य पङ्कजं विदीर्यते।

**कथं नु रक्षोगृहवासदौर्भगं स्वतःप्रमाणं, न च वह्निशोधनम्।**
**अवैमि नष्टो वपुषाप्यनङ्गवज्जनान्तरङ्गेषु कृती स रावणः॥**

उ.सी.च.2/27

चिन्त्यते अत्र सीतया कथं नु एतत् यत्, रक्षोगृहवासस्य तु स्वतःप्रमाणमस्त्यग्निशोधनं न। वपुषा नष्टोऽपि स कृती रावणः कामदेववत् जनान्तरङ्गेष्विदानीं सक्रियोऽस्तीति मया प्रतीयते।

सर्वं वृत्तान्तं श्रुत्वा सीतायाः प्रतिक्रिया दृश्यत एवम्–

**अथ रघुपतिजायैवात्मदेवस्य साक्ष्या-**
**झटिति विमलचेता निश्चिकाय स्वधर्मम्।**
**वदितुमथ च धैर्यात् किञ्चिदाकुञ्चिताक्षी**
**धृततनुरिव काशी प्रक्रमं सा चकार॥**

उ.सी.च.2/60

तदा भगवतो रामस्य विमलचित्ता धर्मपत्नी सीतैवात्मदेवतायाः साक्ष्येण स्वधर्मं निश्चिनोति। शरीरिणी काशी यथा किञ्चिदाकुञ्चिताभ्यां नेत्राभ्यां सा धैर्यपूर्वकमवददेवम्–

**अस्तु मे भवदभीप्सिता स्थितिर्हन्त कुत्रचिदपि क्षमातले।**
**विश्वमस्तु तु विशल्यतां गतः काममद्य सह कीर्तिभिस्तव॥**

उ.सी.च.3/9



मम स्थितिर्भवदभीप्सिता क्षमातले कुत्रचिदप्यस्तु। केवलं तव कीर्तिभिस्सह विश्वमानवो निष्कण्टको भवेदिति।

**प्राणतोऽपि यशसि स्पृहा गुरुः सूर्यवंशिषु हि या प्रशस्यते।**
**तां विभाव्य कलुषा स्नुषाऽद्य वो याति दूरमनुमन्यतान्तमाम्॥**

उ.सी.च.3/25

सूर्यवंशिषु या प्राणतोऽप्यधिकं यशसस्स्पृहा वतते, या प्रसिद्धिरस्ति तां वीक्ष्येयं कलुषिता पुत्रवधूर्दूरं गच्छति। सर्वैरनुमन्यताम्।

**याम्यहं विपिनमेकला गुरुं त्वं पुरेव परिरक्ष सर्वतः।**
**त्यक्तधारमपि वारि भौत्यतो विप्रकर्षमिह नैव लिप्सते॥**

उ.सी.च.3/34

अहमेकला विपिनं यामि, त्वमग्रजं पूर्ववत् सर्वतः परिरक्ष। वारि धारां त्यक्तुं शक्नोति परन्तु शैत्यं न कदापि।

सीताचरितस्य प्रसङ्गेष्वेतेषु अस्याः निर्भयताया आधारः कः? इति प्रश्नश्चेत् पातिव्रत्येनैव सीता निर्भयेति सिद्धम्। पातिव्रत्यमिति शब्दः पतिव्रतमित्यस्मात् शब्दात् 'गुणवचनब्राह्मणादिभ्यः कर्मणि च'' (अष्टाध्यायी 5/1/123) इत्यनेन सूत्रेण 'ष्यञ्' प्रत्यये कृते सति व्युत्पाद्यते अर्थात् पतिव्रतस्य भावः कर्म वेति पातिव्रत्यम्। अत्र विचारणीयमिदं यत् पातिव्रत्येन कथं निर्भयता जायते तर्हि कथयितव्यं, पातिव्रत्येन मनसि सत्त्वगुणो जायते गुणेनानेन मनसि कश्चिद् विशिष्ट आत्मविश्वास उत्पद्यते, तेन विश्वासेनैव निर्भयताया उत्पत्तिरिति। वस्तुतस्तु तस्मिन् काले अन्या अपि स्त्रिय आसन्, यथा अनसूया कौशल्या इत्यादयः। इमा अपि सीतेव पतिव्रता निर्भया भूत्वा स्वकीये जीवने कदापि सत्यमार्गात् परिभ्रष्टा न बभूवुः। वाल्मीकिरामायणे पतिव्रता अनसूया सीतामुपदिशति पातिव्रत्यम्। अनयोः संवादे ज्ञायते यत् सीता पूर्वमेव विषयेऽस्मिन्नुपदिष्टेति। तद्यथा–

**नैतदाश्चर्यमार्यायां यन्मां त्वमनुशाशसे।**
**विदितं तु ममाप्येतद् यथा नार्याः पतिर्गुरुः॥**

वा.रा.अयो.118/2

**यद्यप्येष भवेद्भर्ता अनार्यो वृत्तिवर्जितः।**
**अद्वैधमत्र वर्तव्यं तथाप्येष मया भवेत्॥**

वा.रा.अयो.118/3

काव्येष्वेषु पतिव्रतास्त्रीषु सीताया अस्त्युच्चस्थानम्। स्वयमेवोच्यते विषयेऽस्मिन् महर्षिणा वाल्मीकिना। तद्यथा–

**काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत्।**

वा.रा.बाल.1/4/7

स्वकीये जीवने सीता बहूनि दुःखानि अनुभूय एतत् प्रदर्शितवती यत् या स्त्री आपत्तिकालेऽपि धर्मं पालयिष्यति, अन्यायस्य विरोधं निर्भयत्वेन करिष्यति, तस्याः कीर्तिरस्मिन् जगति विस्तृता प्रसृता च भविष्यति। सीतासदृशं पवित्रजीवनस्यानुपमपति-भक्त्याश्चोदाहरणं जगतः इतिहासे दुष्प्राप्यमस्ति। अस्याः जीवनस्य एतादृशी कापि घटना नास्ति, या अस्माकं मातृवधूभगिनीपुत्रीणाञ्च कृते उत्तमशिक्षाप्रदायिका न स्यात्। सा स्वकीये जीवने यद् निर्भयत्वं प्रदर्शितवती, तत्सर्वं स्त्रीभिरनुकरणीयमस्ति।

❖



# व्याकरणे नव्यत्वम् आधुनिकत्वं च

राधा ब्लिण्डरमान

## 1. नव्यो नाधुनिकः

पाणिनिव्याकरणे नव्यत्वस्य तरङ्गो रामचन्द्राचार्यस्य प्रक्रियाकौमुदीरूपेण चतुर्दशतमशताब्द्यामुत्थाय 1550-1750तमशतकेषु पराकाष्ठामवाप। तस्मिन् काले बहवो वैयाकरणा आत्मानं प्रति अन्यान् समकालिकान् पूर्वकालिकाँश्च विदुषः प्रति 'नव्यपरे' त्यादिशब्दानुपाददुः। यथा लघुशब्देन्दुशेखरे नागेशभट्टः प्रायशः 'परे तु' इति शब्दावुपन्यस्य नूतनविचारमुपस्थापयति। अस्य कालस्य सर्वासु टीकासु 'नव्यनूतननवीनार्वाच्' इत्यादिशब्दानां बाहुल्यं विद्यते, किन्तु विद्वांसः नव्यशब्दस्य पर्यायवाचिनमाधुनिकशब्दम् आत्मनो विषये अन्येषां प्रशंसनीयविदुषां विषये वा न कदाचिदपि प्रयुञ्जते इति दृष्टम्। सामान्यभाषायामाधुनिकशब्दस्य नव्यपर्यायत्वं शब्दकल्पद्रुमेऽपि प्रमाणितं विद्यते। तथापि वैयाकरणैरयं शब्दः प्रायशः प्रतिपक्षिणः कृते प्रयुज्यते। आधुनिकशब्दस्य अस्मिन् सन्दर्भे न केवलम् 'अधुना जात' इत्यर्थः, स्वसमकालीनं प्रति तस्य निन्दायां प्रयुक्तत्वात्। न च आधुनिकत्वेन केषाञ्चित् प्रशंसनीयत्वम् अपरेषां च निन्द्यत्वमित्यवधारणीयम्, उभयत्र गुणदोषसाम्यात्। अत एव आधुनिकशब्दस्य अपरः कश्चनार्थः कल्प्यते, येन नव्यवैयाकरणाः आधुनिकवैयाकरणेभ्यो भिन्ना इति पर्यवस्यति। तादृशी भावना आधुनिकयुगेऽपि दृश्यते। अस्मिन् विषये विचार्यमाणे पारम्परिकनूतनचिन्तनयोः कः सम्बन्धः इत्यपि स्पष्टीकरिष्यते।

प्रथमतस्तु आधुनिकशब्दस्य व्युत्पत्तिं विग्रहवाक्यञ्च प्रदर्श्य तस्य सर्वेऽप्यर्थाः विचारणीया विद्यन्ते। अधुनेत्यव्ययात् ठञ् प्रत्ययो भवति 'कालाट्ठञ्' 4.3.11 इति

सूत्रेण, तदनन्तरम् 'अव्ययस्य भस्य टेर्लोपः' 4187 इति वार्तिकेन टिलोपे जाते आधुनिकशब्दस्सिद्ध्यति। तस्यार्थः 'अधुना जात' इति। किन्तु व्याकरणग्रन्थेष्वयं शब्दः प्रायशोऽधुना जात इति मुख्यार्थं परित्यज्य लक्षणया निन्दार्थकः न्यूनार्थको वा गृह्यते। इत्थञ्च मुख्यार्थघटितं भाष्योदाहरणं–'सर्वेषु धातुष्वर्थनिर्देशस्त्वाधुनिकः'[1] इति। अत्र अधुना जात इति मुख्यार्थ एव प्रतीयते, किन्तु तत्रापि भाष्यकारस्य आशय एवंरूपः–पाणिन्युच्चरितभिन्नत्वादासामाधुनिककृतीनां व्याकरणशास्त्रे तादृशं प्रामाण्यं न विद्यते यथाद्योच्चारणस्य इति। भूषणसारस्य दशमकारिकायाः विचारावसरे कौण्डभट्टः इमं विषयं विशदयति, व्यापारस्य धात्वार्थत्वोपस्थापनाय। तत्रायं प्रसङ्गः–न केवलं भ्वादिगणपठितानुपूर्वीसदृशापूर्ववत्त्वेन धातुत्वं विद्यते, अपितु क्रियावाचकत्वेनापि, अन्यथा विकल्पार्थकस्य वा इत्यव्ययस्यापि धातुत्वमापतेत्, भ्वादिगणपठितवाधातुसादृश्यात्। तत्रैवमुक्तं–''न च गतिगन्धनाद्यर्थनिर्देशो नियामकः, तस्य 'अर्थानादेशनाद्' इति भाष्यपर्यालोचनया आधुनिकत्वलाभात्।'' विकल्पार्थकवाशब्दस्य गतिगन्धनार्थकवाधातोः भिन्नत्वेऽपि न तेन धातुत्वव्यावृत्तिः, गतिगन्धनाद्यर्थनिर्देशानां नियामकत्वाभावादित्याशयः। भीमसेनाद्याचार्यैः रचितत्वात् पाणिन्युच्चरितभिन्नत्वाच्च अस्य गतिगन्धनार्थस्य विकल्पार्थकवाशब्दं प्रति न व्यावर्तकत्वम्। अत्र पाणिनेराद्योच्चारणापेक्षया आधुनिकनिर्देशस्य न्यूनत्वं स्पष्टं भवति। व्याकरणशास्त्रे तस्याधुनिकनिर्देशस्य तावन्नियामकत्वं न विद्यते इति पर्यवसितार्थः, अन्यथा विकल्पार्थकवाशब्दस्य कदापि धातुत्वं न सम्भवेत्, फलव्यापारयोरुभयोर्धात्वर्थत्वे इयं युक्तिश्च न सिद्ध्येत्।

अधोलिखितायामक्षरसमाम्नायविषयकभर्तृहर्योक्तौ तु आधुनिकशब्दस्य अर्थान्तरं विद्यते–''यथैवेदमव्युच्छिन्नं चन्द्रतारकादि एवम् अस्याक्षरसमाम्नायस्य न कश्चिदाधुनिकः कर्ताऽस्ति, एवमेव वेदपारम्पर्येण स्मर्यमाणः।''[2] अत्र प्रयुक्तस्य आधुनिकशब्दस्यार्थः लघुशब्देन्दुशेखरे शरीरिन्नित्युक्तः। सर्वेषाञ्च टीकाकाराणामस्मिन् विषये ऐकमत्यं विद्यते, अन्यथा आधुनिककर्तुरभावे प्राचीनकालिकः कश्चन कर्ता कल्प्येत। न च केवलं नागेशेन आधुनिकशब्दस्य शरीरिन्नित्यर्थः कृतः, नैयायिकनये 'आधुनिकसङ्केत' इत्यस्यापि शरीरिणां मनुष्याणां वा सङ्केत इत्यर्थकत्वात्।

यत्र तु विदुषां विषये 'आधुनिक' इत्युच्यते, तत्र 'शरीरिन्नि' त्यर्थस्यासङ्गतिः



स्पष्टा, विशेषणस्य वैयर्थ्यापत्तेः, सर्वेषामेव विदुषां शरीरित्वात्। 'अधुना जात' इत्यप्यसङ्गतमिति पूर्वमेवोक्तम्, अतः भूषणसारे फणिभाषितभाष्याब्धेरिति (पृ.9) कारिकाव्याख्यानावसरे तट्टीकासु च प्रतिपादितोऽर्थ एव उचितः प्रतिभाति। तत्रोक्तं–''भाष्याब्धेः शब्दकौस्तुभ उद्धृत इत्युक्तिस्तु शब्दकौस्तुभोक्तानामर्थानामाधुनिकोत्प्रेक्षत्वनिरासाय, अन्यथा तन्मूलकस्यास्य ग्रन्थस्याप्याधुनिकोत्प्रेक्षितासारत्वापत्तौ पाणिनीयानामनुपादेयतापत्तेः।'' अस्मिन् सन्दर्भे आधुनिकशब्दस्यार्थो विद्यते 'परम्पराया विच्छिन्नत्वम्', यस्मिन् सति वैयाकरणदृष्ट्या नूतनविचाराणामप्रामाणिकत्वमापतति। प्रभाटीकाकारा अपि 'अधुना जाते'त्यर्थं परित्यज्य ''आधुनिकेति–व्याकरणप्रवर्तकाचार्यतात्पर्यानभिज्ञैराधुनिकैरित्यर्थः। एतेनाधुनिकानामपि प्रामाणिकार्थोपन्यासस्य निरासोऽनुचित इति शङ्का निरस्ता''[3] इति, अधुना जातानामपि विदुषां प्रामाणिकत्वे नव्येति व्यवहार उचित इति च व्यवस्थापयन्ति।

भूषणसारस्यास्मिन् सन्दर्भे व्याकरणप्रवर्तकाचार्यतात्पर्यानभिज्ञत्वमाधुनिकत्वमित्यर्थस्वीकारात् तत्पर्यायवाचिनः शब्दाः स्वतन्त्रस्वोत्प्रेक्षितोच्छृङ्खलेत्यादयः स्युर्नतु नव्येति। तस्य विलोमशब्दाश्च प्रामाणिकपारम्परिकादयः स्युर्नतु प्राचीनेत्यादयः। षोडशशताब्द्या आरभ्य बहुषु वैयाकरणग्रन्थेष्वाधुनिकशब्दः अस्मिन्नेवार्थे प्रयुक्तः। एकमुदाहरणं भूषणसारस्य शाङ्करीटीकायां (तृतीयकारिकायां) विशेषतः दर्शनयोग्यं प्रतिभाति। तत्र तिङ्प्रत्ययानां युगपत्कर्तृकर्मबोधकत्वं कथं न भवतीति विचारप्रसङ्गे उच्यते–''कर्तृमात्रबोधवत् कर्ममात्रस्यापि बोधापत्तिरित्यतस्तात्पर्यग्राहकमाह, तत्तदर्थप्रतीतिर्भवत्वितीच्छयोच्चरितत्वरूपतात्पर्यविषयकमित्यर्थः, शास्त्रप्रवर्तकाचार्यानुभवसिद्धतात्पर्यग्राहकमिति यावत्। तेन कस्यचिदाधुनिकस्य पच्यत इत्यत्र कर्तृबोधे तात्पर्यसत्त्वेऽपि पाणिन्याद्याचार्यतात्पर्याभावान्न कर्तृबोधः, किन्तु कर्मबोध एव इत्यत आह फलव्यापारयोरिति।''[4]

अत्रापि नव्याधुनिकयोर्भेदस्स्पष्ट एव। नव्यविचारः परम्परानुमोदित उत परस्परयाङ्गीकृतो भवति, आधुनिकविचारस्तु तद्विरोधी तया निरस्तश्च। अत एव भट्टोजिदीक्षितः शब्दकौस्तुभस्य वैयाकरणमतोन्मज्जनस्य च प्रणयनावसरे 'फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृत' इति प्रतिजानीते। ममायं स्फोटादिविषयको विचारः नव्यत्वेन स्वीकार्य एव नाधुनिकत्वेन परम्पराविच्छिन्नत्वेन वा इत्येवात्र

तस्याशयः। कथं नूतनकृतिषु प्रामाणिकत्वमायातीति प्रभाटीकायां स्पष्टीकृतम्– "शब्दकौस्तुभस्य भाष्यमूलकतया तत्सारत्वेनास्यापि प्रामाणिकत्वमेवेति भावः।"[5] नव्यव्याकरणे यः कश्चन नूतनो विचारः उद्भाव्यते, तस्य मुनित्रयानुमतत्वे एव प्रामाण्यं भवति, व्याकरणप्रवर्तकाचार्याणां व्याकरणशास्त्रस्य विषये सर्वज्ञत्वस्वीकारात्। भगवतः पाणिनेरपि कृतिः अपौरुषेयश्रुतिमूलकत्वादेव व्याकरणपरम्परायां प्रामाण्यमवाप।[6] 'सिद्धे शब्दार्थसम्बन्धे'[7] इति वार्तिकप्रामाण्यात् यः शब्दार्थयोर्नित्यसम्बन्धः, स एव पाणिन्यादिभिर्मुनिभिः समन्ताज्ज्ञात्वा शास्त्रेषु प्रतिपादितः। यदुक्तं वाक्यपदीये (1.23)– **'नित्याः शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः।**

**सूत्राणां सानुतन्त्राणां भाष्याणां च प्रणेतृभिः॥'**

अतः तद्विचारसिन्धोः कौस्तुभरूपेण यो यो विचार उद्भाव्यते, स एव प्रामाणिको भूत्वा नव्यत्वेन स्वीक्रियते, अन्यथा अप्रामाण्यत्वात्परित्यज्यते। कथं पाणिनिव्याकरणपरम्परायां नूतनविचाराणां प्रामाण्यं परीक्ष्यते, कथं च अप्रामाणिकत्वेन नूतनविचाराः आधुनिका अभिधीयन्ते, तथा च आधुनिकयुगस्य व्याकरणस्रोतसि आधुनिकत्वस्य कीदृशं स्वरूपं भवतीत्यादि सर्वमग्रे विचारणीयम्।

## 2. किन्नाम नव्यत्वं व्याकरणे

कश्चन विद्वान् नव्यव्याकरणपरम्परायां प्रतिष्ठां कामयते चेत् तर्हि 'यथोत्तरं मुनीनां प्रामाण्यम्' नियमस्य प्रक्रियायां, सूत्रार्थकरणे, शाब्दबोधे, वैयाकरणदर्शनादिषु कार्येष्वानुसारणं परमावश्यकं भवति, यतो हि एतन्नियमानुसारित्वमेव नव्यव्याकरणस्यावच्छेदको धर्मः। यद्यप्ययं नियमः प्राचीनकाले एव कैयटेन उपस्थापितः, 'यथोत्तरं हि मुनित्रयस्य प्रामाण्यम्' इत्युक्त्या, तथापि भट्टोजिदीक्षितस्य कालादेवारभ्य अयं सर्वशः प्रसिद्धिं प्राप्नोत्। प्रक्रियाकौमुद्यां तु "यथोत्तरम्" इत्यादिर्न पठितम्। दीक्षितपूर्ववर्तिभिराचार्यैः अयं नियमः तथा नानुसृतः, अए एव प्रौढमनोरमायां दीक्षितः प्रायशः प्रक्रियाकौमुदीकारान् तट्टीकाकारांश्च भाष्यविरोधित्वेन खण्डयति। तथा च प्राचीनव्याकरणेषु मुनित्रयाननुमोदिता बहवः प्रयोगा उपलभ्यन्ते, यथा प्रक्रियाकौमुद्यां भूहः इत्यादयो भाष्यविरुद्धप्रयोगास्साधिताः। नव्येतरवैयाकरणानां "पाणिन्युक्तं प्रमाणं नतु पुनरपरं चन्द्रभोजादिसूत्रं केऽप्याहुस्तल्लघिष्ठम्"[8] इत्येतादृशं नव्यविरुद्धं मतं विद्यते। नव्यप्रथायां तु तादृशरूपाणां परित्यागो भवतीत्यनयोर्भेदः। अत उक्तं हुबन् महोदयैः यन्नव्यव्याकरणे "सीमितं प्रामाण्याश्रयत्वं"[9] विद्यते, तच्च



मुख्यरूपेण मुनित्रयाणां तदनुगामिनामाचार्याणां चेत्यर्थः। नव्यव्याकरणे "कस्यचित्प्रयोगस्य साधुत्वनिर्णयार्थं केवलं कतिपयानां सर्वप्रसिद्धानामाचार्याणां प्रामाण्यं स्वीकरणीयं भवति। तेषामाचार्याणां तारतम्यं परस्परसम्बन्धश्च सुप्रसिद्धः, एवं च वर्तमानकालिक-वैयाकरणानामपि तैः सह सम्बन्धः तारतम्येन परिभाषितो विद्यते।"[10] तादृशं तारतम्यं "यथोत्तरं हि मुनित्रयस्य प्रामाण्यम्" इत्यस्यां कैयटोक्तौ स्पष्टतया परिभाषितं विद्यते। मुनित्रयस्यैव यथोत्तरं प्रामाण्यं विद्यते, अन्येषां तु यथापूर्वमिति तस्याशयः, अन्यथा सर्वत्रैव पूर्वाचार्याणामप्रामाण्यापत्तेः। ननु कथं त्रयाणामेव मुनीनां यथोत्तरं प्रामाण्यं स्वीक्रियते, नान्येषामित्यत्र कारणं मुनीनां सर्वज्ञत्वम्। त एव निखिलशब्दकर्मकसाधुत्वप्रकारकयथार्थज्ञानवन्तो[11] विद्यन्ते, नान्ये, अतस्तेषां यथोत्तरप्रामाण्यस्वीकारे न काचित्क्षतिरिति नव्यवैयाकरणैरवधार्यते, उत्तरमुन्यभिप्रेतेऽर्थे पूर्वमुनेस्तात्पर्यस्वीकारात्। भगवतः पाणिनेः व्याकरणविषयकसर्वज्ञत्वं भगवता पतञ्जलिना महाभाष्ये साधितं, "वर्णेनाप्यनर्थकेन न भवितव्यम्" इत्याद्युक्तिभिः। तादृशं व्याकरणविषयकं सर्वज्ञत्वं कात्यायनपतञ्जल्योरपि विषये स्वीक्रियते कैयटादिभिर्वैयाकरणैः, अतस्तयोरपि ग्रन्थाः शब्दप्रमाणत्वेन प्रसिद्धाः। मुनीनां व्याकरणविषयकनिःशेषज्ञान-वत्त्वस्वीकारादेव तेषां वैमत्यप्रतीतावपि ऐकमत्यमेव दृश्यते नव्यवैयाकरणैः। अत एव 'यथोत्तरं मुनीनां प्रामाण्यमित्यस्योत्तरोत्तरमुन्यभिप्रेतेऽर्थे पूर्वपूर्वमुनीनां तात्पर्यमित्येवार्थः, न तु पूर्वमुनीनामप्रामाण्यमि' ति भूतिकारैर्व्याख्यातम्, "अन्यथैतद्दृष्टान्तेन सम्पूर्णशास्त्र-स्याप्रामाण्यापत्ति" रिति व्यावर्त्यप्रदर्शनपुरस्सरम्।[12] तदेवोक्तं शेखरदीपकसरलयोः[13]- 'अस्मिन् शास्त्रे उत्तरमुनितात्पर्यानुसारेणैव पूर्वमुनेस्तात्पर्यमवधारणीयम्' इति। तथा च शब्दरत्ने - 'सूत्रमतात्प्रत्याख्यानंवादिमतं प्रबलमिति प्रत्याख्यानवादिसम्मतलक्ष्यमेव कथञ्चित्सूत्रमतेऽपि साध्यं, न तु विपरीतं सति सम्भवे।'[14] अयमेव नव्यविदुषां दृष्टिकोणः। भगवतः पाणिनेः पतञ्जलेश्च विचारभेदप्रतीतौ मतैक्यसाधनं प्रौढमनोरमायामपि दृश्यते, 'न बहुव्रीहौ' इति सूत्रविचारप्रसङ्गे - 'न चोपसर्जनानां पाठात्पर्युदासो वार्तिककृतोक्तो नतु सूत्रारूढ इति वाच्यम्।' 'संज्ञोपसर्जनीभूता न सर्वादयः' इति सूत्रकारापेक्षया उत्तरकालिकेन भगवता पतञ्जलिना प्रणीतं वार्तिकं विद्यते, अतः पूर्वपक्षिणाऽत्र सन्देह उपस्थाप्यते यदयं नियमः सूत्रकारेण न ज्ञातः, अतः सर्वादिपाठे उपसर्जनानामपि ग्रहणं सूत्रकारेणाभिप्रेतमिति। एतन्मतखण्डनार्थं दीक्षितेनोपायः विन्यस्यते- 'अन्वर्थसंज्ञालाभेन सूत्राक्षरैरेव तल्लाभाद्' इति। अनया विनिगमकयुक्त्या सूत्रवार्तिककार-योर्मतैक्यमत्र प्रमाणितम्।

अन्वर्थसंज्ञाबलाद् न केवलमत्र भाष्यमतं सूत्रकारानुमतमपित्वन्येषु बहुषु

स्थलेषु इत्युपस्थापनार्थं नागेशेन 'यथोत्तरं मुनीनां प्रामाण्यम्' इत्यस्य ज्ञापकमपि विनियोजितं[15], 'धिन्विकृण्व्योर च' (3.1.80) इत्यस्मिन् सूत्रेऽकारग्रहणरूपम्। 'अतो लोपः' इत्यनेन अकारस्य लोपे गुणव्यावृत्तये पुनः स्थानिवद्भावेन तदुपस्थितिरकारग्रहणप्रयोजनं भाष्यकारेणोक्तम्। तस्य फलं धिन्वन्तीत्यादीनि रूपाणि। धिवि प्रीणने इति धातोरिकारानुबन्धलोपे नुमागमे च धिन्व् इति धातुर्भवति, तस्य लटि झ्यादेशेऽन्तादेशे च 'धिन्विकृण्व्योर च' इति सूत्रेण उप्रत्ययः वकारस्य अकारश्च भवति - धिन् अ उ अन्ति। अन्ति इत्यत्र 'अलोऽन्त्यस्य' इति प्रवर्तते, अ इत्यत्र 'अतो लोपः'। अत्र उप्रत्ययस्य आर्धधातुकत्वात् इकारस्य लघूपधगुणः प्राप्तः। तद्व्यावृत्त्यर्थं भगवता पाणिनिना वकारस्यं अकारः क्रियते। अकारलोपानन्तरं तस्य स्थानिवद्भावे कृते आर्धधातुकाव्यवहितोत्तरत्वाभावाद् गुणो न भवति।

अत्रायं सन्देहः - कथं सूत्रकारेणायं गौरवग्रस्तोपायोऽनुसृतः, लघुतमोपायसत्त्वे? अयं लघूपायश्च यथा - धिन्व उ इत्यवस्थायां वकारस्य लोपे कृते 'न धातुलोप आर्धधातुके' (1.1.4) इत्यनेन गुणव्यावृत्तिस्स्यात्। अयं लघूपायः कथं नाश्रियते इत्यस्य कारणं भाष्यकारेण ध्वन्यते - 'अपि च प्रत्याख्यायते स योगः। तस्मिन् प्रत्याख्याते गुणः स्यादेव, तस्मादत्वं वक्तव्यम्' इति। ननु अत्रायं सन्देह उपस्थापयितुं शक्यते - भाष्यकारेणैव 'न धातुलोप.' इति योगः प्रत्याख्यायते, नतु सूत्रकारेण। कथं तर्हि उत्तरकालिकभाष्यकृतप्रत्याख्यानं सूत्रकारेण ज्ञातुं शक्यं, कथं च तत्प्रत्याख्यानानुसारमकारग्रहचारितार्थ्यं साध्यत इति। अत्र नागेश उत्तरयति यदनेन उत्तरोत्तरमुन्यभिप्रेतेऽर्थे पूर्वपूर्वमुनीनां तात्पर्यमित्यर्थिका 'यथोत्तरम्' इति परिभाषा ज्ञाप्यते, अतः सूत्रकारस्य भाष्यकृतप्रत्याख्यानस्वीकारे न किमपि विचित्रम्।

सूत्रभाष्यमतयोरेवम्भूतं सामञ्जस्यं कर्तव्यं भवति यथासम्भवम्। असम्भवत्वे तु नागेशेनायं पक्षः कल्प्यते-''अन्यथा सूत्रमप्रमाणमेवेति च प्रत्याख्यानं सूत्रसम्मतमिति च ध्वनितम्। सूत्रकृत्खण्डितप्राचीनर्षिवाक्यानामप्रामाण्यवत् सूत्रकारवचःखण्डनप्रवृत्तभाष्यवार्तिकवचनैस्तदंशे सूत्रकारवचसोऽप्यप्रामाण्यकल्पनैवोचितेति दिक्।''[16] दिगर्थश्च भावप्रकाशे विस्फोर्यते - ''किञ्च भाष्यस्यासन्दिग्धत्वेन सन्दिग्धार्थस्य सूत्रस्यान्यथा व्याख्यैवोचिता।

किञ्चेतिहासपुराणाद्यैर्वेदार्थवर्णनवद् वार्तिकभाष्यादिग्रन्थैः सूत्रार्थवर्णनमुचितम्।



तस्मात्तयोः प्रवृत्त्या सूत्रं व्यर्थमेव, तदाह दिगिति।''[17] तदेवोक्तं बालमनोरमायामपि- ''सूत्रकाराद् वार्तिककारस्य उभाभ्यामपि भाष्यकृत इत्येवं मुनीनामुत्तरोत्तरस्य ग्रन्थस्य प्रामाण्यं पूर्वपूर्वस्याप्रामाण्यमिति वैयाकरणसमय इति भावः।''[18]

ननु क्वचित्सूत्रस्याप्रामाण्यस्वीकारे अर्धजरतीयन्यायस्य प्रसक्तिः भाष्यविरोधश्च स्यात्। इत्थं च तत्र भाष्यम्-''ननु च य एव तस्य समयस्य कर्ता स एवेदमप्याह। यद्यसौ तत्र प्रमाणम्, इहापि प्रमाणं भवितुमर्हति। प्रमाणमसौ तत्र चेह च''[19] इति। नागेश इमं दोषमेवं समाधत्ते लघुशब्देन्दुशेखरे-''प्रत्याख्यानपरं भाष्यं तु किमदृष्टार्थमेव तदुच्चरणमुत दृष्टार्थमपीत्येवं विचारपरम्। सर्वत्र प्रत्याख्यानमेवं परमेव,'' एवञ्च ''किञ्चिद्दृष्टादृष्टार्थवत्, किञ्चिच्छुद्धादृष्टार्थवत्, सर्वथानर्थकं न किञ्चित्।''[20] व्याकरणस्य दृष्टादृष्टार्थप्रयोजनत्वं वाक्यपदीयेऽपि वर्ण्यते -''साधुत्वज्ञानविषये सेयं व्याकरणस्मृतिः'' (1.158), एवं च ''स्मृतयो बहुरूपाश्च दृष्टादृष्टप्रयोजनाः'' इति (1.7)। अतः यत्र कुत्रचित् सूत्रस्य विषयेऽप्रामाण्यवैयर्थ्यादिवचनमुपलभ्यते तत्सर्वं तस्यादृष्टार्थत्वपरमित्यवधार्यते। अन्यथा अपाणिनीयत्वभिया भाष्यकारः वृद्धिरादैच् (सू.1.1.1) इत्यस्य विचारप्रसङ्गे लिङ्गरूपोपायविषये ''सिद्धत्येवम्। अपाणिनीयं तु भवति''[21] इति न वदेत्। मुनित्वेऽपि भाष्यकारस्य कृतेऽपाणिनीयत्वं वृश्चिकादंशवद्भवति, किमुत अन्येषां वैयाकरणानाम्? अतः नव्यवैयाकरणस्रोतसि अन्तर्गतत्वं कामयमानेन विदुषा किन्नाम अपाणिनीयत्वमिति विशेषरूपेण ज्ञातव्यं भवति।

तच्च लघुशब्देन्दुशेखरे ''हलन्त्यम्'' (1.3.3.) इति सूत्रस्य अन्योन्याश्रयत्वपरिहारप्रसङ्गे स्पष्टीभवति। तत्रैव नागेशेन ''हलन्त्यम्'' (1.3.3.) ''उपदेशेऽजनुनासिक इत्'' (1.3.2) इति सूत्रद्वयं विभज्य ''उपदेशे इदन्त्यम्'', ''अच्'', ''अनुनासिकः'' इति न्यासः कृतः। नैतदपाणिनीयमित्यपि तत्र साधितम् - ''न च पाणिनिसूत्रभेदे पारायणादावदृष्टहानिः, तथा च तत्र तत्र भाष्यमपाणिनीयन्तु भवतीति वाच्यम्, कल्प्यमानस्य लघुत्वेऽस्यादोषत्वाद्।''[22] तदेव दृढयितुं भाष्यमप्युपन्यस्तम् - ''सूत्रभेदं तमुपचरन्ति यत्र तदेवान्यत्सूत्रं क्रियते भूयो वा। यदि तदेवोपसंहृत्य क्रियते, नासौ सूत्रभेदः''। ननु सूत्रस्य स्थाने पाणिनीयैस्सर्वत्र स्वकीयो न्यासः क्रियेत सूत्रस्य चादृष्टार्थत्वमेव कल्प्येत इति चेदुक्तं शेखरकारेण -''सति सम्भवे दृष्टद्वारैवाङ्गानामदृष्टा-र्थत्वमिति तदाशयः।''[23] एवञ्च किञ्चिद्दोषपरिहाराय परिष्कारमुद्रया वा वैयाकरणैः न्यासाः कल्प्यन्ते,

नतु मुनित्रयसाधितशब्दातिरिक्तशब्दसाधुत्वसम्पादनाय। अत्रापि नागेशः अपाणिनीयं कमपि प्रयोगं न साधयत्यतः नास्य न्यासस्यापाणिनीयत्वम्। अन्ततस्त्वयं पक्षः नागेशेन परित्यक्तः नियमज्ञापकापेक्षत्वेनातिगौरवाहतत्वात्, नत्वपाणिनीयत्वात्। 'आ समन्तादेति गच्छति सहेता' इतीदं तु लघुभूतं समाधानं भाष्यविरोधभिया परित्यक्तम्। इत्थं प्रकारेण नव्यवैयाकरणैः 'यथोत्तरं मुनीनां प्रामाण्यम्' इति वचनानुसारणपूर्वकं नूतनविचाराः प्रस्तूयन्ते। यतो ह्युक्तं वाक्यपदीये– ''**न चागमादृते धर्मस्तर्केण व्यवतिष्ठते। ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम्॥**''[24]

यावन्ति शब्दरूपाणि मुनित्रयसम्मतानि तान्येव पाणिनीयानां कृते उपादेयानि, इतराचार्यापेक्षया मुनित्रयस्य असाधुशब्दकर्मकसाधुशब्दावधिकपृथक्करणविषयकाधिकप्रामाण्यस्वीकारादिति सर्वनव्यवैयाकरणसम्मतम्। किन्तु यत्र यत्र सूत्रकारभाष्यकारयोः प्रयोगभेदः पर्यवस्यति, तदा कस्य प्रयोगस्साधुरिति विषये अनेकेषां नव्यविदुषां मतभेदः। यथा सूत्रकारमते त्वत्कपितृकः, भाष्यकारमते तु त्वकत्पितृकः सिद्ध्यति। भैरवमिश्रानुसारं ''यथोत्तरम्'' इत्यादिवचनबलात् भाष्यकारस्यैव प्रयोगः साधुः[25] इति। अयमेव पक्षः तत्त्वप्रकाशिकाख्यभूतिव्याख्यायामुपस्थापितः, ''व्याख्यानतो विशेषप्रतिपत्तिरि'' त्यादिपरिभाषायाः विचारप्रसङ्गे–''अन्ये तु, इदं (पूर्वकृतं) व्याख्यानमनुचितं, यद्यल्लक्षणं तत्सर्वमनुष्ठापकमिति व्याप्तेः 'न बहुव्रीहौ' (1.1.29) इत्यादिप्रत्याख्यातलक्षणानां 'त्वत्कपितृक' इत्यादिलक्ष्यानुष्ठापकत्वेन व्यभिचारेणासम्भवात्। तस्माद्विशब्दस्त्वर्थे। तथा च सन्देहात्तु, सन्देहमात्रेण लक्षणमलक्षणं न भवति, प्रत्याख्यानवादिना लक्षणमलक्षणं भवदपि सन्देहमात्रेण लक्षणमलक्षणं साक्षात्परम्परया वासन्दिग्धानाहार्यप्रामाण्यज्ञानानस्कन्दितलक्ष्यधर्मिकसाधुत्वप्रकारकबोधजनकं न भवतीत्यर्थः, लक्षणशब्दस्येदृशार्थ एव वैयाकरणनिकाये रूढेः।''[26] इति।

किन्तु नायं सिद्धान्तिपक्षः, अत एव सः 'अन्ये तु' इतिवाक्यपुरस्सरं प्रतिपादितः। वस्तुतः ''धिन्विकृण्व्योर च'' (3.1.80) इत्यत्राकारग्रहणरूपज्ञापकेनेदमेव लक्ष्यते–''एतेन सूत्रसार्थक्याय (काशिका) वृत्तिकारोक्तं व्याख्यानमेव प्रबलमित्यपास्तम्''[27] इति, भाष्यकृतसूत्रप्रत्याख्यानमपि प्रबलमित्यर्थः। अत उक्तं भाष्यस्य छायानामकव्याख्यायाम्–''उभयप्रामाण्यादुभयमपि विकल्पेन साध्वित्यपि तथा''[28]



इति। उभयोः सूत्रकारभाष्यकारयोः प्रामाण्यात् 'त्वत्कपितृकः' इति सूत्रसम्मतरूपं, 'त्वकत्पितृकः' इति भाष्यसम्मतरूपञ्च, उभयं विकल्पेन साध्वित्यर्थः। अत एव एतद्रूपद्वयं सामान्येनाध्याप्यते नव्यवैयाकरणाचार्यैः।

केचन नव्यवैयाकरणास्तु ''यथोत्तरं मुनीनां प्रामाण्यमि'' तीमां शिष्टोक्तिं परिभाषारूपेण न स्वीकुर्वन्ति। अयं च सिद्धान्तिपक्षः प्रतिपादितो भूतिटीकायां - 'केचित्तु व्याख्यातृवचसां व्याख्येयवचनार्थतात्पर्यनिर्णायकत्वस्यौत्सर्गिकत्वेन तदर्थं परिभाषारम्भस्तज्ज्ञापकञ्च विफलम्। न हि क्षुन्निवृत्तये भोजनं कार्यमिति वचनमाचार्येण निरमायि' इति। अस्मिन्नपि पक्षे नागेशेन पूर्वोक्त एव भगवतः पाणिनेः आशयः अङ्गीकृतः–'भाष्यकारादिभिर्मद्वचसो यत्रार्थे तात्पर्यं बोधितं सोऽर्थो ममाभिप्रेत' इति।[29]

एकश्चापरः पक्ष उपस्थापितः भूतिटीकायाम्। तदनुसारं 'यथोत्तरम्' इति वचनं 'व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणमि'ति परिभाषायाः सिद्धार्थानुवादकमेव। अस्मिन्मते शेखरकृतोक्तं ज्ञापनं नाङ्गीक्रियते, 'स्वस्य स्वाप्रामाण्यसाधकत्वानौचित्यात्',[30] अपितु शिवोच्चरितणकारानुबन्धरूपं ज्ञापनान्तरं कल्प्यते। किन्त्वग्रे भूतिटीकायामिदं मतं खण्डितम्–''व्याख्यानत इत्यतः स्वरसतः तादृशार्थाप्रतीतिः, निरुक्तार्थे ज्ञापितेऽपि णकारस्य स्वांशेऽचारितार्थ्यञ्चेति वदन्तीति दिक्''[31] इत्युक्त्या। व्याख्यानत इत्यतः स्वरसतः 'यथोत्तरम्' इत्यादिरर्थः न प्रतीयते इति ग्रन्थकाराशयः, यतो हि 'अक्षरसमाम्नाये णकारद्वयं किमर्थम्' इति प्रश्ने 'यथोत्तरं मुनीनां प्रामाण्यम्' इत्यसम्बद्धमुत्तरं विद्यते। अस्योत्तरस्य असम्बद्धत्वात् णकारानुबन्धस्य स्वांशे चारितार्थ्याभाव उक्तः। एवञ्च विजयाटीकायामप्ययं पक्षः खण्डित–'यत्तु स्वेन स्वस्याप्रामाण्यबोधनमनुचितमिति नैतज्ज्ञापकमिति तन्न, यथार्थबोधने अनौचित्यविरहाद्'[32] इति।

## के शिष्टाः, के चाधुनिकाः

यदि 'यथोत्तरमि'त्यादि 'व्याख्यानत' इत्यस्य सिद्धार्थानुवादकं स्यात् तदा 'व्याख्यानत' इति परिभाषायाः मुनित्रयविषयकत्वमेव स्यात्। किन्त्वेवं नास्ति, तस्यां परिभाषायां शिष्टकृतव्याख्याने तात्पर्यपर्यवसानात्। न च मुनित्रयाणामेव शिष्टत्वं वक्तुं शक्यते, अन्येषामपि प्रामाणिकाचार्याणामपि शिष्टपदेन ग्रहणात्। अन्यथा ''न च व्याख्यानतो निर्णयो भविष्यतीति वाच्यं, सर्वत्रैव व्याख्यानतो निर्णये शास्त्रस्याकिञ्चित्करत्वादि''[33] ति शेखरदीपकोक्तिर्न सङ्गच्छेत। तत्र चायं प्रसङ्गः–लण्सूत्रस्थण-

कारस्य इत्संज्ञकत्वमपाकुर्वन् शेखरकारः यण्पदघटितसूत्रेषु यप्रत्याहारव्यवहारं दोषत्वेनोपस्थापयति। तादृशव्यवहारे 'यप्रत्याहारेण यकाराद्यकारान्तसमुदायघटकवर्णाः गृह्यन्ते उत इकाराद्यकारान्तसमुदायटकवर्णाः' इत्ययं सन्देहो दुरुद्धरस्स्यात्। अस्मिन्नेव विषये शेखरदीपककारः व्याख्यानेन समाधानं निषेधयति। अत्र कस्यचिदपि शिष्टपुरुषस्य व्याख्याने तात्पर्यं, नतु मुनित्रिकान्तर्गतयोः कात्यायनपतञ्जल्योरेव व्याख्याने इति स्पष्टमेव। तथा च मुनित्रयवचनातिरिक्तेषु भर्तृहर्यादिवचनेषु शिष्टवचनमिति व्यवहारो व्याकरणनिकाये सर्वत्र दृश्यते।

वस्तुतः 'यथोत्तरम्' इति वचनं शिष्टत्वं परिभाषयद् 'व्याख्यानत' इति परिभाषायाः प्रवृत्तिक्षेत्रं नियमयति। यथोत्तरं मुनित्रयप्रामाण्यस्याङ्गीकारत्वमेव शिष्टत्वं नव्यव्याकरणे, तद्भिन्नत्वं त्वाधुनिकत्वमपारम्परिकत्वमित्यादि। ये यथोत्तरं मुनित्रयप्रामाण्यमनङ्गीकुर्वाणाः तत्तात्पर्यानभिज्ञा विद्वांसः विद्यन्ते, तेषां व्याख्यानाद् न विशेषप्रतिपत्तिर्न च तद्विषयिणी 'व्याख्यानत' इति परिभाषा। यः कश्चन विद्वानस्य नियमस्यानुसारी वर्तते स तु शिष्टः, तस्य व्याख्यानमपि परम्परान्तर्गतमेव। एवं रूपेण 'यथोत्तरम्' इत्युक्तिः नव्यव्याकरणे स्वीकार्यास्वीकार्ययोः सीमानं व्यवस्थापयति।

दुर्भाग्यवशादस्मिन् युगे प्रभाटीकायां लक्षितं व्याकरणप्रवर्तकाचार्यतात्पर्यानभिज्ञत्वरूपम् आधुनिकत्वं बहुषु जनेषु दृश्यते, अत एव 'अहं गच्छन्नस्मि' इत्यादयोऽपाणिनीयाः प्रयोगाः बहुभ्यो मुखेभ्यो निस्सरन्ति। किन्तु सर्वेऽपि आधुनिकयुगीनाः संस्कृतज्ञाः आधुनिकाः मुनित्रयतात्पर्यानभिज्ञा वा न विद्यन्ते, अत उक्तं प्रभायां यद् वर्तमानकालिकानां विदुषां प्रामाणिकार्थोपन्यासस्य निरासोऽनुचित एव।[34] यद्यपीदानीं सर्वे पाश्चात्त्यदेशीयाः संस्कृतज्ञा अपि आधुनिका एव अभिधीयन्ते, तेषु ये पारम्परिकज्ञानयुक्ता विद्वांसः सन्ति, तेषामपि मुनित्रयतात्पर्यानभिज्ञत्वं वक्तुं न शक्यते। तादृशविद्वद्भिरिदमप्यनुज्ञायते यत् "कस्यचित् प्राचीनभारतीयग्रन्थस्य भारतीयैः कथमर्थविस्फोरणं क्रियते इत्यज्ञात्वा अस्माभिः तस्य ग्रन्थस्य विस्फोरणं कर्तुं न शक्यम्", एवं च "प्रामाण्यज्ञानान्वेषणपुरस्सरम् अनेकविधपारम्परिकज्ञानविषये मनसोऽसङ्कुचितत्वमपेक्षितं विद्यते।"[35] तथो चोक्तं वाक्यपदीये–"**तस्मात् प्रत्यक्षमप्यर्थं विद्वानीक्षेत युक्तितः।**"[36] अतः यत्र यत्र वैदेशिकानां देशिनां वा विदुषां परम्पराज्ञानं दृश्यते तत्र तत्र तेषामपि व्याख्यानविषये प्रामाण्यं नव्यत्वञ्च पर्यवस्यति।



व्याकरणे न केवलं मुनित्रयाणां प्रामाण्यमपितु तदुत्तरवर्तिनामाचार्याणामपि विद्यते इति भाष्येऽपि ध्वनितम्, "यस्त्वप्रमत्तगीतस्तत्प्रमाणम्"[37] इत्युक्त्या। अस्मिन् विषये नागेशेन एवंरूपेण व्याख्यातम्–"भाष्ये यस्त्वप्रमादेन गीतं यस्य कस्यापि तत्प्रमाणमिति प्रतिनिर्देशलिङ्गम्। ननु कथं ज्ञातम् अयमप्रमत्तगीत इति, अत आह - श्रुतिरनुग्राहिकेति।"[38] श्रुतिमूलकत्वेन स्मृतित्वेन च अष्टाध्यायी अप्यनुग्राहिका, तद्व्याख्यानभूतं स्मृतिरूपं महाभाष्यं च अनुग्राहकम्। भाष्ये च यानि सिद्धान्तिवाक्यानि तान्येव प्रमाणं नत्वेकदेशभाष्यम्। अतः यः कश्चिदपि विद्वान् सिद्धान्तिभाष्यानुसारी मुनित्रयतात्पर्यज्ञानवाँश्च, सः शिष्टः आप्तो वा, तद्वचनं च प्रामाणिकं "व्याख्यानत" इति परिभाषाबलात्। उक्तं च वैयाकरणसिद्धान्तमञ्जूषायाम्–"आप्तो नामानुभवेन वस्तुतत्त्वस्य कात्स्न्र्येन निश्चयवान्, रागादिवशादपि नान्यवादी यः स इति चरके पतञ्जलिः।"[39] यः कोऽपि एतद्गुणयुक्तः मुनित्रयतात्पर्यावगाही च, सः नव्यवैयाकरणसंज्ञार्हः, यस्तु मुनित्रयोपदेशमस्वीकुर्वाणः तद्विरुद्धवादी च स आधुनिक इति स्पष्टीभवन्ति।

❖

## सन्दर्भाः


1. महाभाष्यम्, 8.4.18
2. महाभाष्यदीपिका, 92
3. भूषणसारे प्रभा, पृ.10
4. भूषणसारे प्रभा, पृ.48
5. भूषणसारे प्रभा, पृ.11
6. टिघ्वादीनां वेदादिष्वदृष्टानां शब्दानां विषये त्वयं विचारः प्रक्रियाकौमुदीप्रसादे (पृ.10) प्रस्तावितः- **यास्त्वेताः स्वेच्छया संज्ञाः क्रियन्ते टिघुभादयः। कथं नु तासां साधुत्वं नैव ताः साधवो मताः॥ अनपभ्रंशरूपत्वान्नाप्यासामपशब्दता। हस्तचेष्टा यथा लोके तथा सङ्केतिता इमाः॥**
7. महाभाष्यम्, 1.1.1; पृ.59
8. नारायणभट्टस्य "अपाणिनीयप्रमाणता"।
9. "a simplified authority structure' Houben, "Small Step, Giant Leap":8
10. "in order to have auhoritative support for the correntness of a from only a very small and well-defined set of authors need to have to be accepted; these authoritative authors have a well-defined relation among themselves, and current grammarians have a well-defined relation on these ones "Houben, "Small Step, Giant Leap" : 5.

11. भूतिटीका, परिभाषेन्दुशेखर, परिभाषा 1, पृ.7
12. भूतिटीका, परिभाषेन्दुशेखरः, परिभाषा 1, पृ.8
13. लघुशब्देन्दुशेखरः, शेखरदीपिका। पृ.219, प्रौढ़.सरलटीका पृ.449
14. प्रौढमनोरमायां शब्दरत्नम्, पृ.448-9
15. उद्द्योतः (म.भा. 3.1.4 पृ.112, 1.1.6 पृ.339) लघुशब्देन्दुशेखरः (पृ.219), लघुशब्दरत्नम् (प्रौ.म., पृ.448-9)
16. शब्दरत्नम्, पृ.448-9
17. भावप्रकाशः, प्रौढमनोरमायाम्, पृ.449
18. सिद्धान्तकौमुद्याम्, पृ.223
19. महाभाष्यम्, 3.1.6 पा.सू. 3.1.94 पृ.137
20. पृ.6
21. महाभाष्यम्, 1.1.3 पृ.160
22. लघुशब्देन्दुशेखरः, पृ.12
23. लघुशब्देन्दुशेखरः, पृ.12
24. वाक्यपदीयम् 1.30
25. ''एतेन विकल्पकल्पनिरासः।'' (प्रौढ़मनोरमा, पृ.449)
26. परिभाषेन्दुशेखरे तत्त्वप्रकाशिकानाम्नी भूर्तिव्याख्या, पृ.7
27. महाभाष्ये उद्द्योतः, 1.1.6, पृ.339
28. महाभाष्ये छाया, 1.1.6, पृ.339
29. भूतिटीका, परिभाषेन्दुशेखरः, परिभाषा 1, पृ.8-9
30. भूतिटीका, परिभाषेन्दुशेखरः, परिभाषा 1, पृ.8
31. परिभाषेन्दुशेखरः भूतिटीका, परिभाषा 1, पृ.9
32. परिभाषेन्दुशेखरः विजयाटीका, परिभाषा 1. पृ.10
33. लघुशब्देन्दुशेखरे शेखरदीपकाटीका, पृ.8-9
34. भूषणसारे प्रभा. पृ.10
35. We cannot begin to make sense of a text from India's past without knowing what sense Indians themselves made of it. <...> We need to combine the search for the singular positivist truth with an openness to the truths of tradition." (Pollock 2009, "Indian Phiology And India's Philogoy"442)
36. वाक्यपदीयम्, 2.141
37. महाभाष्यम् 1.1.1, पृ.36
38. उद्द्योतः, पृ.36-7
39. वैयाकरणमतमञ्जूषा. पृ.11



# मधुररसविमर्शः

डॉ. कुन्दनकुमारः

काव्यशास्त्रे भक्तिं रसरूपेण प्रतिष्ठापयितुमनेके भक्तिरसाचार्याः नानाविधग्रन्थान् लिखितवन्तः। तेषु भक्तिरसप्रतिष्ठापनपरमाचार्यः रूपगोस्वामी भक्तिरसामृतसिन्धु-नामके ग्रन्थे प्रबलतर्केण भक्तिं रसरूपेण प्रतिष्ठापयामास। तस्य मतं समर्थयन् मधुसूदनसरस्वतीः कथयति यद् भक्तिरेव पूर्णरसो वर्तते यतो हि सहृदयः अस्मिन्नेवानिर्वचनीयमानन्दं लभते। शृङ्गारादयः अन्ये रसाः एतादृशाः आनन्दप्रदायकाः न सन्ति। अतः खद्योतसदृशाः तुच्छाः वर्तन्ते। साहित्याकाशे भक्तिरेव रसराट् सूर्यो वर्तते–

**कान्तादिविषया वा ये रसाद्यास्तत्र नेदृशं रसत्वं पुष्यते पूर्णसुखास्पर्शित्वकारणात्।**
**परिपूर्णरसा क्षुद्ररसेभ्यो भगवद्रतिः खद्योतेभ्य इवादित्यप्रभेव बलवत्तरा।।**[1]

भक्तिरसामृतसिन्धौ रूपगोस्वामी भक्तेः प्रधानरसत्वं तथा अन्यशास्त्रीयरसानां गौणरसत्वमुद्घोषितवान्। तत्र मुख्यानां पञ्चानां रसानामुल्लेखः एवमस्ति–

**मुख्यस्तु पञ्चधा शान्तः प्रीतिः प्रेयाँश्च वत्सलः।**
**मधुरश्चेत्यमी ज्ञेया यथापूर्वमनुत्तमाः।।**[2]

इत्थं भक्तिं रसराड्रूपेणोद्घोष्य मधुरम् उज्ज्वलं वा रसं रसराजत्वाधार-निरूपणक्रमे हेतुत्रयं निर्दिशति–

**निवृत्तानुपयोगित्वाद् दुरुहत्वादयं रसः।**
**रहस्यत्वाच्च संक्षिप्य विततङ्गोऽपि लिख्यते।।**[3]

जीवगोस्वामी अपि इदमेव मतं समर्थयन् उज्ज्वलनाम्ना मधुरमेवादौ

परिगणयति - क्रमेणोज्ज्वलवत्सलसख्यदास्यशान्तानां विषयालम्बनत्वमस्य व्यञ्जितमिति सर्वोत्कर्षः। तेषां यथापूर्वं श्रैष्ठ्यमित्युज्ज्वलरसस्यैव मुख्यत्वम्।[4]

भगवद्भक्तहृदयेषु निरन्तरं विद्यमानः भगवद्विषयकरतिभावः एव यदा विभावादिभिः संवलितो भूत्वा आस्वादनीयतामाप्नोति तदा सः मधुरनामधेयः भक्तिरसः निगद्यते।

**वक्ष्यमाणैर्विभावाद्यैः स्वाद्यतां मधुरा रतिः।**
**नीता भक्तिरसः प्रोक्तो मधुराख्यो मनीषिभिः॥**[5]

रूपगोस्वामी उज्ज्वलनीलमणौ शृङ्गारस्य उज्ज्वलस्य मधुरापरनामधेयस्य वा रसस्य विस्तरेण वर्णनं करोति। तथा मधुरभक्तिः रसराड् इत्युद्घोषयति-

**मुख्यरसेषु पुरा यः संक्षेपेणोदितो रहस्यत्वात्।**
**पृथगेव भक्तिरसराट् स विस्तरेणोच्यते मधुरः॥**[6]

रूपगोस्वामी शृङ्गारस्य श्रेष्ठत्वं प्रतिपादयन् उज्ज्वलनीलमणिग्रन्थे कथयति - **'अत्रैव परमोत्कर्षः शृङ्गारस्य प्रतिष्ठितः'**।[7]

अस्यैव आनन्दचन्द्रिकाटीकायां विश्वनाथचक्रवर्ती कथयति -**'श्रीकृष्णेन सह व्रजसुन्दरीणामीदृशलीलाविशेष एव शृङ्गारस्य परमोत्कर्ष इत्यर्थः।'**[8]

तथा च मुनिः भरतः कथयति प्रसङ्गेऽस्मिन्–

**बहु वार्यते यतः खलु यत्र प्रच्छन्नकामुकत्वं च।**
**या च मिथो दुर्लभता सा मरमा मन्मथस्य रतिः॥**
**लघुत्वमत्र यत्प्रोक्तं तत्तु प्राकृतनायके।**
**न कृष्णे रसनिर्यासस्वादार्थमवतारिणि॥**[9]

अत्र शृङ्गारे यत् कामुकत्वं वर्तते तत्तु प्राकृतनायके न तु कृष्णे। यथा हि विश्वनाथचक्रवर्ती कथयति–

'तत्तु प्राकृतनायक इत्यादिना प्राकृतनायक इति कृष्णात् अपरनायक इत्यर्थः। कृष्णे त्वलघुत्वे हेतुः रसनिर्यास इति। रसनिर्यासो रससारः। मधुररसविशेष इत्यर्थः।'[10]

लोके यः शृङ्गाररसः स एव कृष्णस्य नायकत्वविषये मधुरः उज्ज्वलो वा रस इति भावः।



रूपगोस्वामी उज्ज्वलनीलमणौ मधुरस्य उज्ज्वलस्य वा रसस्य भेदद्वयं करोति-'स विप्रलम्भो संभोग इति द्वेधोज्ज्वलो मतः।'[11]

रूपगोस्वामिनः अनुसारं विप्रलम्भस्य मधुरस्य शृङ्गारस्य वा लक्षणं वर्तते-

**यूनोरयुक्तयोर्भावो युक्तयोर्वाथ यो मिथः।**
**अभीष्टलिङ्गनादीनामनवाप्तौ प्रकृष्यते॥**
**स विप्रलम्भो विज्ञेयः सम्भोगोन्नतिकारकः॥**[12]

तत्रैव संयोगशृङ्गाररूपस्य मधुररसभेदस्य लक्षणम् उज्ज्वलनीलमणौ वर्तते-

**दर्शनालिङ्गनादीनामनुकूल्यान्निषेवया।**
**यूनोरुल्लसमारोहन् भावः संभोग ईर्यते॥**
**मनीषिभिरयं मुख्यो गौणश्चेति द्विधोदितः॥**[13]

शृङ्गाररसस्यालम्बनविभावः सिद्धान्ततः नायकनायिके च स्तः, परन्तु व्यवहारे मनोवैज्ञानिकदृष्ट्या नायिका एवालम्बनविभावो भवति। रूपगोस्वामी शृङ्गारस्यालम्बनरूपेण कृष्णस्य रूपं वर्णयति उज्ज्वलनीलमणौ–

**शृङ्गाररससर्वस्वं शिखिपिच्छविभूषणम्।**
**अङ्गीकृतनराकारमाश्रये भुवनाश्रयम्॥**[14]

अत्र श्रीकृष्णः शृङ्गाररसस्य सर्वस्वं वर्तते। श्रीकृष्णं विना शृङ्गाररसोऽपि स्वस्य वैयर्थ्यं प्रकटयति। अत्रैव शृङ्गारे कृष्णस्य गुणान् वर्णयति रूपगोस्वामी–

**अयं सुरम्यो मधुरः सर्वसल्लक्षणान्वितः।**
**बलीयान्नवतारुण्यो वावदूकः प्रियंवदः॥**
**सुधीः सप्रतिभो धीरो विदग्धश्चतुरः सुखी।**
**कृतज्ञो दक्षिणः प्रेमवश्यो गम्भीरताम्बुधिः॥**
**वरीयान्कीर्तिमान्नारीमोहनो नित्यनूतनः।**
**अतुल्यकेलिसौन्दर्यप्रेष्ठवंशीस्वनाङ्कितः॥**
**इत्यादयोऽस्य शृङ्गारे गुणाः कृष्णस्य कीर्तिताः।**
**उदाहृतिरमीषां तु पूर्वमेव प्रदर्शितः॥**[15]

अनेन प्रकारेण रूपगोस्वामी शृङ्गारस्य श्रेष्ठत्वं प्रतिपादयति-'**अत्रैव परमोत्कर्षः शृङ्गारस्य प्रतिष्ठितः**'।[16]

अस्याः कारिकायाः आनन्दचन्द्रिकाटीकायां विश्वनाथचक्रवर्ती कथयति- '**श्रीकृष्णेन सह व्रजसुन्दरीणामीदृशलीलाविशेष एव शृङ्गारस्य परमोत्कर्ष इत्यर्थः**।'[17]

स्वमतस्य पुष्ट्यर्थं रूपगोस्वामी भरतमुनिं समर्थयन् तस्यैव कथनं प्रमाणरूपेण प्रस्तौति–

**बहु वार्यते यतः खलु यत्र प्रच्छन्नकामुकत्वं च।**
**या च मिथो दुलर्भतया सा परमा मन्मथस्य रतिः॥**[18]

अत्र मन्मथस्य सम्बन्धिनी रतिः परमा मता। यत्र रतौ प्रच्छन्नकामुकता या च रतिर्मिथो दुर्लभतामयी सा मन्मथस्य सम्बन्धिनी रतिः परमा मता। तस्याः रतेः प्राकृतनायके लघुत्वं प्रोक्तम्, किन्तु अवताररूपे उत्तमप्रकृतिके नायके कृष्णे एषः रतिभावः मधुररसविशेषः कथ्यते। यथोक्तम् रूपगोस्वामिना–

**लघुत्वमत्र यत्प्रोक्तं तत्तु प्राकृतनायके।**
**न कृष्णे रसनिर्यासस्वादार्थमवतारिणि॥**[19]

अत्र विश्वनाथचक्रवर्ती लिखति-रसनिर्यासो रससारः मधुररसविशेष इत्यर्थः। मधुरनाम्नो रसस्य निर्यासस्वादोऽपि दर्शितः श्रीशुकेन–'भगवानपि रन्तुं मनश्चक्रे' इति आत्मारामोऽप्यरीरमत्' इति।[20]

गीतायां 'जन्म कर्म च मे दिव्यम्' इति श्लोकांशस्य व्याख्यायां मधुसूदनसरस्वतीः लिखति दिव्यमप्राकृतिकम् इति। कृष्णः दिव्यः अप्राकृतिकः नायकः वर्तते। तादृशं दिव्यं नायकं वीक्ष्य गोपाङ्गनाः कामविह्वलाः भवन्ति–

**कन्दर्पकोटिलावण्ये त्वयि दृष्टे मनांसि नः।**
**कामिनीभावमासाद्य स्मरक्षुब्धान्यसंश्रयम्॥**[21]

इति गोपीनां वचः श्रुत्वा श्रीभगवानुवाच–

**दुर्लभो दुर्घटश्च युष्माकं सुमनोरथः।**
**मयानुमोदितः सम्यक् सत्यो भवितुमर्हति॥**
**वृन्दावने भविष्यामि प्रेयान्वो रासमण्डले।**
**जारधर्मेण सुस्नेहं सुदृढं सर्वतोऽधिकम्॥**[22]



कृष्णरूपमालाम्बनमेव विवृण्वन् रूपगोस्वामी लिखति–

**शृङ्गाररससर्वस्वं शिखिपिच्छविभूषणम्।**
**अङ्गीकृतनराकारमाश्रये भुवनाश्रयम्॥**
**अनुकूलदक्षिणशठा धृष्टश्चेति द्वयोरयोच्यन्ते॥**[23]

अत्र शृङ्गाररससर्वस्वं इति शब्दस्य व्याख्यायां जीवगोस्वामी लिखति- 'शृङ्गाररसः सर्वस्वं यस्येति बहुव्रीहिणा कृष्णः सोऽपि गतसर्वस्वो रङ्क इति भवतीति व्यज्यते। शृङ्गाररसस्य सर्वस्वमिति तत्पुरुषेण शृङ्गाररसोऽपि तं विना स्वस्य वैयर्थ्यं जानातीति।[24]

रासलीलायां मधुररसस्य प्रकर्षः भवति। कृष्णस्य विरहे कामभावनया पीडिताः गोप्यः सदैव श्रीकृष्णं स्मरन्ति। वियोगावस्थायां प्रेम पुष्टं भवति। अन्ततः ताः कामभावनया अपि हरिं प्राप्ताः - 'कामाद् गोप्यो हरिं प्राप्ताः'।[25]

कामदेवः प्रथमजन्मा शक्तियुक्तः देवः वर्तते। श्रीकृष्णः अस्योपरि विजयार्थं रासलीलां रचयति-'रासक्रीडायां मनसो रसोद्गमः न तु देहस्य' इति कथनानुसारं मनसो रसोद्गमावस्था मधुररस इत्युच्यते।

ध्वन्यालोके आनन्दवर्धनः शृङ्गारमेव मधुरं कथयन् परमप्रह्लादनात्मकममन्यत–

**शृङ्गार एव मधुरः परः प्रह्लादनो रसः।**[26]

शृङ्गार एव रसान्तरापेक्षया प्रह्लादनहेतुत्वात् मधुरः प्रतिपादितः। भरतः नाट्यशास्त्रे शृङ्गारविषये अत्युत्कृष्टं वाक्यं लिखति–

**यत्किञ्चिल्लोके शुचि मेध्यमुज्ज्वलं दर्शनीयं वा तच्छृङ्गारेणोपमीयते॥**[27]

अनेन प्रकारेण अप्राकृतिकस्य दिव्यनायकस्य कृष्णस्य शृङ्गारिकलीलानां सम्बन्धे मधुररसः एव प्रयोक्तव्य इति रूपगोस्वामिनः कथनं सयुक्तिकं सुसङ्गतञ्चास्ति। कन्दर्पकोटिलावण्यः चोरजारशिखामणिः व्रजविपणिलम्पटः केलिकलानिपुणः कुञ्जविहारी श्रीकृष्णः गोपीनां मनोभिलषितकामनापूर्तये शृङ्गारिकलीलाः रचयति। रूपगोस्वामी रसदृष्ट्या ताः एव लीलाः मधुररसरूपेण वर्णयति।

❖

सन्दर्भाः


1. भक्तिरसायनम् 2.75,76
2. भ.र.सि. 2.5.96
3. भ. र. सि. 3.5.2
4. उ. नी. म. नायकभेदे लोचनरोचनीटीका
5. उ. नी. म. 1.3
6. उ. नी. म. 1.2
7. उ. नी. म. 1.17
8. उ. नी. म. 1.17 आ. च. टीका
9. उ. नी. म. 1.18
10. उ. नी. म. 1.17 आ. च. टीका
11. उ. नी. म. शृङ्गारभेदे श्लोकः।
12. उ. नी. म. शृङ्गारभेदे श्लोकः।
13. उ. नी. म. संभोगभेदे श्लोकः।
14. उ. नी. म. नायकभेदे श्लोकः 19
15. उ. नी. म. नायकभेदे श्लोकः 5-17
16. उ. नी. म. नायकभेदे श्लोकः 17
17. उ. नी. म. नायकभेदे श्लोकः 17 आ. च टीका
18. उ. नी. म. नायकभेदे श्लोकः 17
19. उ. नी. म. नायकभेदे श्लोकः 18
20. उ. नी. म. नायकभेदे श्लोकः 17 आ. च. टीका
21. उ. नी. म. नायकभेदे श्लोकः 18 आ. च. टीका
22. उ. नी. म. नायकभेदे श्लोकः 17 लो. रो. टीका
23. उ. नी. म. नायकभेदे श्लोकः 19-20
24. उ. नी. म. नायकभेदे श्लोकः 19 लो. रो. टीका
25. गर्गसंहिता विज्ञानखण्डः, 4.26
26. ध्वन्यालोकः 2.7
27. नाट्यशास्त्रम् अध्यायः 6


❖



# विवेकशास्त्रे तत्त्वविवेकः

डॉ. सावित्री शतपथी

सांख्यशास्त्रमेव विवेकशास्त्रमिति वक्तुं शक्यते। महामुनिकपिलप्रणीतेऽस्मिन्सांख्यदर्शने प्रकृतिपुरुषविवेकः मुख्यः प्रतिपाद्यविषयः। पुरुषशब्दोऽत्र पारिभाषिकोऽस्ति। पुं–पुमान्–चिति–पुरुषादिशब्दैः चेतनात्मैवाबोध्यते। चिद्रूपेणैकत्वेऽपि जीवपरमभेदेन पुरुषद्वयं मुख्यतोऽङ्गीक्रियते शास्त्रेऽस्मिन्। चिदात्मनः प्रतीकरूपेणानेकजीवपुरुषानेकदेहाद्युपाधिषु ''अयमात्मा'' ''अहमात्मा'' इत्यादिभिः सर्वैरनुभूयत एव। जीवपुरुषाणामधिष्ठातृत्वेन एक एव परमपरपुरुषः विराजते समग्रेऽस्मिन् ब्रह्माण्डे प्रकृतिपरिचालकब्रह्माण्डरक्षकरूपेणैव। परमर्षिः ''ईश्वारासिद्धेः''[1] इति सूत्रेण ईश्वरं जगदुपादानत्वेनासिद्धं कृत्वाऽपि ''ईदृशेश्वरसिद्धेः सिद्धाः''[2] इति सूत्रं जगदधिष्ठातुरीश्वरस्य सिद्धिं विदधाति सुष्ठुतया।

सर्वैरनुभूयमानाः जागतिकपदार्थाः समग्रं जगच्च सत्त्वादित्रिगुणस्वरूपायाः प्रकृतेरंशविशेषाः। यथा स्माकं शरीरेन्द्रियादिभ्य आत्मनः पृथग्बुद्धिर्नैव भवति तथा जडप्रकृतितः परमपुरुषस्य पृथग् बुद्धिः सामान्यतया नैव सम्भवति। यदा तु महता प्रयत्नेन दृढश्रद्धाबलेन च प्रकृतिपुरुषयोः–जड़चेतनयोः वा गुणदोषविवेचनपूर्वकं पृथक् पृथग् रूपेणोभयोः सामान्यविशेषभावेन च पुङ्खानुपुङ्खतया बुद्धिरुदेति तदानीं विवेकशास्त्रेण दृढेनानाद्यविवेकमप्यन्तं कृत्वा दुःखान्मुक्तिरूपां जीवन्मुक्तिं प्राप्नोति साधकः। तदुक्तं स्मृतौ–

**अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन च्छित्वा।**
**ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्त्तते भूयः॥**[3] इति

किञ्च सकलब्रह्माण्डे एकमेव परमार्थतत्त्वं जगन्नियन्तृत्वेन सर्वविद्यमानम्। सर्वज्ञः स परमपुरुष एवं बाह्यान्तर्जगदुभयं परिचालयत्यधिष्ठातृरूपेण प्रेरकत्वेन नियन्तृत्वेनैकमात्रं सद्वस्तु यद्विना संसारः नास्ति एव। जड़प्रकृतिः चेतनसान्निध्यं

विना जगदुत्पादिका भवितुं नार्हति। अयस्कान्तमणिवत्स्वतः सान्निध्यं चेतनपुरुषे प्राप्यैवाचेतनाऽपि प्रकृतिः ज़गज्जननीत्वेन परिणमति। यथोक्तं सांख्यसूत्रे– "तत्सन्निधानादधिष्ठातृत्वं मणिवत्।"[4] तथा च विशेषकार्येष्वपि जीवानां सूत्रद्वयेन शरीरान्तःकरणादीनामधिष्ठातृत्वेन जीवपुरुषस्य, ब्रह्माण्डाधिष्ठातृत्वेन च परमपुरुषस्य सिद्धिं कृतवानासीन्महामुनिः कपिलः।

सत्त्वादिस्वरूपायां प्रकृतिजनन्या अनन्तेयं सृष्टिर्न स्वस्य कृते अपितु चेतनस्य कृते आत्मपुरुषस्य कृते इति नं केवलं सांख्यसिद्धान्तोऽपितु सर्वलोकानुभवसिद्धमेतत्। प्रकृतिमातृकायाः लीला चेतनेन चेतनाय चेतनपुरुषैरेवेति नास्ति द्विरुक्तिः। लीलेयमनादिरनन्ता चेति श्रुतिस्मृतिसिद्धम्। परोपकारिणीयं गुणवती प्रकृतिः निर्गुणपुरुषस्योपकारं सर्वथा सततं साधयति। भोगापवर्गरूपमुभयं पुरुषार्थं यत्नेन प्रयच्छति। स्वयमभुञ्जानाऽपि सुखादिफलं जीवं भोजयित्वाऽन्ते च विवेकबुद्धिं प्रदाय संसारबन्धान्मुक्तं करोति। तात्त्विकश्रुतेः मार्मिकोक्तिरित्थम्–

**अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानाः सरूपाः।**

**अजो ह्येको जुषमाणोऽनुशेते जहात्येनां मुक्तभोगामजोऽन्यः॥**[5] इति।

सृष्टेर्मूला प्रकृतिर्यथा स्वीयाधर्मादिसत्त्वस्वभावाद् एकैकपुरुषे प्रवर्तते, सुखदुःखादि फलं सम्पाद्य कृतार्थयति, पुरुषे स्वयं बध्नाति समर्पितं करोति तथैव पुनः स्वीयज्ञानरूपात् सात्त्विकस्वभावादेव विवेकञ्च प्रदाय एकैकस्मात् जीवपुरुषात् निवर्तते, स्वयं विमुच्यते। कारिकायामुक्तमीश्वरकृष्णेन विदुषा–

**रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः।**

**सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण॥**[6] इति।।

पुनरपि सांख्यसूत्रेण–"**रूपैः सप्तभिरात्मानं बध्नाति प्रधानं कोषकारवद्विमोचयत्येकरूपेण।**"[7] इति।।

दृश्यते सिध्यते च लोके शास्त्रे च प्रकृतिः प्राकृतिकपदार्थानामुपयोगः साक्षात्परम्परया परस्य जीवपुरुषस्य कृते एव। सृष्टेः सर्वं कार्यं सकलेयं सृष्टिंश्चात्मपुरुषस्य भोगायापवर्गाय चोद्दिष्टम्। शक्तिस्वरूपिणी मूलां प्रकृतिर्जगदम्बा भवानी रुद्राणी दुर्गा महाकालीति रूपैः च पूज्यते भूमण्डलेऽस्मिन्। दृश्यस्थूलप्रकृतिरपि निःस्वार्थं सेवते जगज्जनान् प्रत्यक्षतया। केनचित्कविनोक्तम्–

**पिबन्ति नद्यः स्वयमेव नोदकं, फलानि खादन्ति स्वयं न पादपाः।**

**धराधरो वर्षति नात्महेतवे परोपकाराय सतां विभूतयः॥** इति।



तस्मात् चिदात्मतत्त्वं यथा परमार्थसद्वस्तु तथा प्रकृतिः प्राकृतिकजगदपि व्यावहरिकसद्वस्तु इति न केनाप्येतद्वारयितुं शक्यते। जडचेतनरूपेणोभयोः सद्वस्तुनोरत्यन्तं विलक्षणत्वेऽपि ऐक्यबोध एवाविवेकिता। चिद्रूपपुरुषस्य भोगरूपप्रयोजनसिद्धये तत्परा प्रकृतिरपि पुनः विवेकबुद्धिं प्रदाय विमुक्तये च सततं प्रयतते। यत्कृते जगदिदं यस्य प्रयोजनसम्पादनार्थं सत्त्वादिस्वरूपा प्रकृतिः सृष्टौ प्रवर्त्तते, तस्यैवात्मपुरुषस्यानुसन्धानमादौ भवेत्। यश्च जीवपुरुषः शरीरेन्द्रियादीनामधिष्ठातृत्वेनान्तःकरणस्य प्रेरकत्वेन प्रत्येकं हृत्पुण्डरीके बुद्धिगुहायामन्तर्यामिरूपेण स्थित्वा चालयति सर्वान्। तदुक्तं श्रीमद्भगवद्गीतायाम्–

**ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।**

**भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया॥**[8] इति।

विज्ञानाचार्येण सांख्यभाष्यकारेणाप्युक्तं स्वीयभाष्ये–

ईश्वरतावान् अन्तःकरणविशिष्टः पुरुषः ईश्वरः[9] इति सांख्यमते ईश्वरलक्षणमीश्वरस्योपादानत्वनिषेधप्रसङ्गे एवोक्तम्।

सर्वेषां जीवेश्वराणामधिष्ठातृरूपेणान्यं परमं चेतनं (पूर्णकामं) सर्वसाक्षिरूपं सर्वान्तर्यामि परब्रह्म, सांख्ये परमपुरुषः जगदधीश्वरप्रकृतिरक्षकत्वेन पूज्यते। स एव सर्वशक्तिमान्सर्वविद्यमानः परमात्मा परमेश्वरः जीवपुरुषाणामधिष्ठानम्। प्रकृतिनियन्ता प्रेरयिता सर्वज्ञपुरुष एकः एवैकरसत्वेन सततं प्रकाश्यते। भगवती श्रुतिः कथयति मार्मिकोक्तिमिमाम्–

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**

**तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योऽभिचाकशीति॥**[10] इति।

किञ्च "प्रधानाविवेकादन्याविवेकस्य तद्धाने हानम्"[11] इति सांख्यसूत्रानुसारं जड़चेतनयोः प्रकृतिपुरुषयोर्भेदसाक्षात्कारात् प्रधानाविवेकनिवृत्तौ सत्यां देहेन्द्रियाद्यभिमानोऽपि निवर्तते। जीवपुरुषेषु औपाधिकभेदबोधेनैव जीवपरमपुरुषयोरधिष्ठातृत्वधर्मत्वेन भेदसाक्षात्कारः संभवति। ततश्च जीवपरमयोः सद्रूपेण चिद्रूपेणोभयोरैक्यबोधादेव विवेकोदयरूपसत्यप्राप्तिः, ततश्च स्वस्वरूपोपलब्धिः, "तदा द्रष्टुः स्वरूपेऽवस्थान"[12] मिति मुनिपतञ्जलिवचनमिदं प्रमाणम्। विवेकज्ञानमेतत् सत्यज्ञानं यथार्थज्ञानं तत्त्वज्ञानं कैवल्यरूपस्य साध्यस्य साधनं भवति। एवं तत्त्वसाक्षात्कारेण विवेकानुभूत्या च परमार्थस्य सम्यक् ज्ञानं लब्ध्वा द्वन्द्वादिपरित्यागेन परां शान्तिमधिगच्छति जीवः, एतदेव कैवल्यं विवेकाशास्त्रेणैव प्राप्यते।

तदानीं सम्यक् जानाति साधकः चिद्रूपं परमार्थातिरिक्तमवशिष्टं सर्वं वस्तु सत्त्वादिरूपं मायाख्याष्टरूपं जडप्रकृतितत्त्वमात्रम्। इत्थं प्रकृतिपुरुषविवेकदर्शनेनैव कैवल्यरूपपरतत्त्वदर्शनं संजायतेऽवश्यं विवेकशास्त्रेण सांख्येनेति महामुनेर्भगवतः कपिलस्य सिद्धान्तः।

1. सां.सू.प्र.अ.सू.62
2. सां.सू.तृ.अ.स.57
3. गीता 15/2
4. सां.प्र.भा.सू.16/17
5. श्वे.उ.4/5
6. सां.का.62
7. सां.प्र.तृ.73-सू.
8. गीता 18/61,
9. सां.प्र.भा.पु.सं.204
10. ऋ.वे.1/164
11. सां.प्र.भा.56/प्र.112
12. यो.सू.स.पा.3 सूत्र

❖



# न्यायवैशेषिकदर्शनप्रतिपादिते पदार्थसाधर्म्यवैधर्म्ये : प्रयोजनदृष्ट्या एका समीक्षा

अंकिता मिश्रा
डॉ. करुणानन्द मुखोपाध्यायः

## भूमिका

सा चेयं साध्यमानापि रूपादेव हि शाश्वती।
चकास्त्यपुनरावृत्तिर्न स्वर्गवदपायिनी॥[1]

जयन्तभट्टोक्तेयं मुक्तिः प्रायशः अन्यदार्शनिकानामपि सम्मता। सा च मुक्तिः प्रमाणप्रमेयादिपदार्थतत्त्वज्ञानाद्[2] भवति इति न्यायडिण्डिमः। पदार्थानां तत्त्वज्ञानार्थं गोतमवात्स्यायनप्रभृतिभिः आचार्यैः प्रथमतया लक्षणद्वारा सामान्यविवेचनं, पश्चाच्च परीक्षाद्वारा विशेषविवेचनं कृतम्। एषा एव न्यायदर्शनपदार्थप्रतिपादनशैली। एतां शैलीम् अनुसृत्य आचार्यविश्वनाथेन न्यायसिद्धान्तमुक्तावल्यां सर्वप्रथमं द्रव्यादिपदार्थानां सामान्यविवेचनं कृतम्, ततः नियमानुसारं पदार्थानां विशेषविवेचनमावश्यकम्, किन्तु तत् अकृत्वैव तेन पदार्थसाधर्म्यवैधर्म्यनिरूपणाख्यम् एकम् नवीनं प्रकरणम् आरब्धम्। विश्वनाथस्य इयमुक्तिः प्रसिद्धा वर्तते–"सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते।"[3] एतस्मिन् प्रकरणे तेन साधर्म्यवैधर्म्ययोः अर्थः, पदार्थानां साधर्म्यं, वैधर्म्यञ्च प्रतिपादितम्। दिनकरमहाचार्येणाऽपि दिनकर्यां रुचिपूर्वकं पदार्थसाधम्यवैधर्म्ययोः निरूपणं कृतम्।[4] रामरुद्र्यामपि ग्रन्थकारेण साधर्म्यवैधर्म्ययोः निरूपणं कुर्वता परम्परायाः निर्वाहः कृतः।[5]

न केवलं नव्यन्यायग्रन्थेषु, वैशेषिकदर्शनस्य प्रमुखग्रन्थेष्वपि पदार्थानां साधर्म्यवैधर्म्ययोः निरूपणं जातम्। तथाहि वैशेषिकभाष्यकारः आचार्य प्रशस्तपादः

पदार्थसाधर्म्यवैधर्म्यप्रतिपादनेनैव पदार्थधर्मसंग्रहाख्यस्य ग्रन्थस्य प्रारम्भं कृतवान्।[6] किं च श्रीधरभट्टेन न्यायकन्दल्यां[7], श्रीवल्लभाचार्येण न्यायलीलावत्याम्[8], श्रीशंकरमिश्रेण न्यायलीलावतीकण्ठाभरणे[9], उदयनेन किरणावल्याम्,[10] वर्धमानोपाध्यायेन प्रकाशे[11] पदार्थसाधर्म्यवैधर्म्ययोः निरूपणं कृतम्।

उपर्युक्तविवेचनक्रमेषु पदार्थानां साधर्म्यवैधर्म्ययोः निरूपणम् अतीवमहत्त्वपूर्णं विद्यते। मनसि प्रश्नः समुपजायते यत् न्यायवैशेषिकदर्शनस्य सर्वेषु प्रमुखग्रन्थेषु पदार्थानां स्वतन्त्रप्रतिपादनेन सह तेषां साधर्म्यवैधर्म्यनिरूपणस्य किमस्ति प्रयोजनम्? किं पदार्थस्वरूपज्ञाने अभिवृद्धिरेव पदार्थसाधर्म्यवैधर्म्यनिरूपणस्य परं प्रयोजनम्? उत अन्यदपि उद्देश्यं वर्तते?

एतेषां प्रश्नानां समाधानार्थम् अस्माभिः न्यायवैशेषिकदर्शनस्य प्रमुखाचार्यविरचितानां कृतीनां सम्यगध्ययनं परिशीलनञ्च कृतम्, फलरूपेण यत्समाधानं लब्धं तद् अत्र प्रस्तूयते।

**साधर्म्यवैधर्म्यनिरूपणस्य उद्देश्यम्**

प्रशस्तपादादारभ्य उदयनपर्यन्ताः सर्वेऽपि आचार्याः पदार्थसाधर्म्यवैधर्म्यनिरूपणेन सह तस्य प्रयोजनीयता अपि सम्यक् विरचिता। तदनुसारं साधर्म्यवैधर्म्यनिरूपणस्य द्विविधं प्रयोजनमस्तीति प्रतीयते। तयोराद्यम्–

**(क) सम्यग् व्यवहारस्य सिद्धिः**–न्यायवैशेषिकदर्शनम् अस्ति वस्तुवादिदर्शनम्, तथाहि घटपटजलादयः पदार्थाः बाह्याः सन्ति, तैः सह इन्द्रियसन्निकर्षादिना सम्यग् ज्ञानम् (तत्त्वज्ञानापरनामधेयम्) उपजायते, ततश्च यथार्थव्यवहारो भवति। पदार्थानां स्वतन्त्रविवेचनमात्रं न पर्याप्तं भवति तत्त्वज्ञानाय, तदर्थं तेषां साधर्म्यवैधर्म्यप्रतिपादनमपि आवश्यकतां भजते। तथाहि आदानप्रदानकथनशयनभोजनसम्बन्धस्थापनादीनां व्यवहाराणां कृते यैः मनुष्यैः सह उपर्युक्तो व्यवहारः कर्तव्यः, यैः द्रव्यैर्वा व्यवहरणीयम्, तेषां मनुष्याणां द्रव्याणां च सम्यग् ज्ञानम् आवश्यकं वर्तते अन्यथा व्यवहारे भ्रान्तिः प्रसज्येत, फलमपि विपरीतं लभ्येत। व्यवहारे इयं रीतिः नैसर्गिकी वर्तते यत् प्रथमं तावत् (वस्तुविषयकं, व्यक्तिविषयकं वा) ज्ञानं, ततस्तद्विषयिणी इच्छा, इच्छया च आत्मनि कृतिः, ततश्च शरीरादौ चेष्टा, ततः आदानादिव्यवहारो भवति। ज्ञानमस्ति सर्वव्यवहाराणां मूलम्, ज्ञानं विना न कोऽपि



व्यवहारः अस्तित्वं लभते। अतएव उक्तम् अन्नम्भट्टेन–''सर्वव्यवहारहेतुर्ज्ञानम्।''[12] ज्ञानं यदि यथार्थं भवेत् तदा व्यवहारोऽपि यथार्थो भवति, पक्षान्तरे ज्ञानं यदि भ्रमात्मकं भवेत् तदा व्यवहारोऽपि भ्रमात्मको भवति। किञ्च जीवने अस्माभिः विविधतापूर्णः व्यवहारः अनुष्ठीयते, तदर्थं व्यक्तीनां वस्तुनां च अन्यस्मात् स्पष्टतया पार्थक्यज्ञानम् आवश्यकम् अस्ति। यथा–

**1. व्यवहारस्य प्रथमः प्रकारः**–स्त्रीत्वसाम्येऽपि भगिनीजायाभ्रातृजायाजायाभगिनीप्रभृतिभिः सह अस्माभिः समानो व्यवहारो नैव अनुष्ठीयते। अर्थात् भगिन्या सह यः व्यवहारो क्रियते, न सोऽनुष्ठीयते जायया सह, न वा भ्रातृजायया सह, किन्तु तासां प्रत्येकं प्रति पृथक् पृथक् स्नेहपूर्णः व्यवहारः अनुष्ठीयतेऽस्माभिः। एतादृशपृथग्व्यवहारे यः कुशलः स एव व्यवहारे समाजे च कुशली पारदर्शी इति च कथ्यते। एतत् सम्यग्व्यवहारं प्रति व्यक्तीनां अन्यस्मात् पार्थक्यज्ञानम् आवश्यकम्, तच्च वैधर्म्याधीनम्। वैधर्म्यं च व्यावृत्ततया पृथक्तया व्यक्तीनां वस्तुनां च तत्त्वज्ञानं जनयति।

**2. व्यवहारस्य द्वितीयः प्रकारः**–एवं च श्रावणीपूर्णिमातिथौ कस्यचन पुरुषस्य हस्ते रक्षासूत्रबन्धनाय एकस्मिन्नेव समये सहोदरा, ज्येष्ठतातपुत्री, मातुलपुत्री, मातृष्वसृपुत्री, पितृष्वसृपुत्री च समागताः, अथ च ताभिः प्रत्येकैः रक्षासूत्राणि बद्धानि, मिष्टान्नद्रव्याणि अपि खादितानि। तदानीं तेन पुरुषेण ''कृते च प्रतिकर्तव्यम्'' इत्यादिरीत्या ताभ्यः समानरूपेण वस्त्राणि आभूषणानि रूप्यकाणि च प्रदीयन्ते। एतदेव सम्यग्व्यवहारशब्दवाच्यतां भजते। तदर्थं तासु सर्वासु भगिनीषु समानताज्ञानम् आवश्यकम्, अन्यथा व्यवहारे सामञ्जस्यं न भविष्यति। तच्च समानताज्ञानं साधर्म्याधीनम्। साधर्म्यं समानतया व्यक्तीनां वस्तूनां च तत्त्वज्ञानं जनयति। स्पष्टं जातमिदानीं सम्यग्व्यवहारे साधर्म्यवैधर्म्यज्ञानस्य प्रयोजनीयता।

**3. व्यवहारस्य तृतीयः प्रकारः** – किञ्च यः विषयविरक्तः नित्याऽनित्यवस्तुविवेकी शमदमादिसाधनसम्पन्नः सन् मोक्षमार्गे गन्तुमिच्छति, तस्य कृतेऽपि व्यक्तीनां वस्तूनां च साधर्म्यवैधर्म्यज्ञानम् अत्यन्तम् आवश्यकं वर्तते। यतो हि सः मार्गः अत्यन्तं कठिनः, श्रुतिः कथयति–''**क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत् कवयो वदन्ति।**''[13]

अतः तस्य कृते कैः सह सम्बन्धः त्याज्यः, कुत्र विश्रामः कर्तव्यः, कदा साधनानि अनुष्ठेयानि, के ग्रन्थाः अध्येतव्याः इत्यादि-सर्वेषां सम्यग् ज्ञानम् आवश्यकम्, अन्यथा मोक्षमार्गात् विच्युतिः सम्भाव्यते, एतत् कालस्थानवस्तुव्यक्तीनां सम्यग्ज्ञानाय तासां साधर्म्यवैधर्म्यज्ञानं साधनभूतमस्ति इति सिद्धा मोक्षवाञ्छानामपि सम्यग्व्यवहारे साधर्म्यवैधर्म्यनिरूपणस्य प्रयोजनीयता।

**( ख ) साधर्म्यवैधर्म्यज्ञानेन मोक्षस्य प्राप्तिः**—पदार्थानां साधर्म्यवैधर्म्य-निरूपणस्य प्रमुखम् उद्देश्यमस्ति अन्तेवासिनां मोक्षस्य प्राप्तिः। अर्थात् पदार्थानां साधर्म्यवैधर्म्यज्ञानं मोक्षस्य प्राप्तये हेतुरस्ति। न्यायवैशेषिकदर्शने तत्त्वज्ञानाद् मोक्षाऽव्याप्तिर्भवति। आचार्यप्रशस्तपादेन उक्तम्—

**''द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानां साधर्म्य-वैधर्म्यतत्त्वज्ञानं निःश्रेयसहेतुः।**[14]

किञ्च महर्षिगौतमेनाऽपि उक्तम्—''प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयव-तर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेय-साधिगमः।[15] उभयाचार्यवचसा सिद्ध्यति यत् पदार्थतत्त्वज्ञानमेव मोक्षहेतुः, तच्च तत्त्वज्ञानं साधर्म्यवैधर्म्यज्ञानमेव।

**1. मोक्षकारणतायां प्रथमः पर्यनुयोगः**—यद्यपि प्रशस्तपादवचनेन गौतमवचनेन च प्रतिभाति यत् तत्त्वज्ञाने एव मोक्षकारणता अस्ति तथापि ''यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः''[16] इति महर्षिकणादवचनेन धर्मे एव मोक्षकारणता अस्ति इति प्रतीयते, तस्मात् प्रशस्तपादगौतमवचनेन सह कणादवचनस्य विरोधः दृश्यते, अतः भवति संशयः मोक्षं प्रति किं कारणम्? धर्म उत तत्त्वज्ञानम्?

**संशयनिराकरणम् —** वैशेषिकसूत्राणां तद्भाष्यस्य च पर्यालोचनेन प्रतीयते यत् निःश्रेयसप्राप्तिः धर्मेणैव भवति, किन्तु पदार्थसाधर्म्यवैधर्म्यज्ञानात्मकेन तत्त्वज्ञानेन धर्मस्य उत्पत्तिर्भवति, अतः तत्त्वज्ञानं निःश्रेयसहेतुः। यथा परामर्शादेव अनुमितिर्भवति, परामर्शस्तु व्याप्तिज्ञानादुदेति। एतावता अनुमितिं प्रति व्याप्तिज्ञानस्य कारणता न निषिद्ध्यते, तथैव तत्त्वज्ञानाद् धर्मोत्पत्तिः धर्माच्च निःश्रेयसोदयः। एतावता तत्त्वज्ञानस्य निःश्रेयसहेतुता न निवार्यते। वस्तुतस्तु पदार्थतत्त्वज्ञानं धर्मोत्पत्तिद्वारा निःश्रेयसं प्रति हेतुर्भवति। एतदभिप्रायं स्फुटयति आचार्यश्रीधरः—''तन्निःश्रेयसं



धर्मादेव भवति द्रव्यादितत्त्वज्ञानं तस्य कारणत्वेन निःश्रेयससाधनमित्यभिप्रायः।''[17]

**2. मोक्षकारणतायां द्वितीयः पर्यनुयोगः**—मोक्षकारणविषये पुनः संशयः उदेति—मोक्षस्य किं कारणम्? तत्त्वज्ञानम्? उत साधर्म्यवैधर्म्यज्ञानम्? कुतः संशयः? गौतमेन पदार्थसाधर्म्यवैधर्म्यज्ञानस्य मोक्षहेतुता कुत्रापि नाङ्गीक्रियते अर्थात् तत्त्वज्ञानमात्रं मोक्षहेतुरिति उच्यते। पक्षान्तरे प्रशस्तपादेन उक्तम्— ''पदार्थसाधर्म्यवैधर्म्य-तत्त्वज्ञानं निःश्रेयसहेतुः।'' अतः भवति संशयः—मोक्षं प्रति तत्त्वज्ञानमात्रं हेतुः उत पदार्थसाधर्म्यवैधर्म्यतत्त्वज्ञानम्? एतत्प्रश्नस्य समाधानात् पूर्वमिदं द्रष्टव्यं यत् तत्त्वं किम्? यस्य ज्ञानात् निःश्रेयसप्राप्तिर्भवति। आचार्य उदयनः किरणावल्याम् कथयति—''तत्त्वमनारोपितं रूपम्''[18] अर्थात् पदार्थानां शुद्धम् अनारोपितं रूपमेव तत्त्वम्। आशयस्तु अयम् – आत्मनि पदार्थविषकज्ञानोत्पत्तिप्रकारः द्विविधः, प्रथमस्तावत् पूर्वपूर्वानुभवजनितसंस्कारप्रभावितान्तःकरणेन इन्द्रियेण च सम्बद्धविषयकज्ञानम् आत्मनि उत्पद्यते, तज्ज्ञानं आरोपितवस्तुविषयकम् अतो न तत्त्वज्ञानम्। द्वितीयस्तावत् पूर्वानुभवजनितसंस्काराऽप्रभावितान्तःकरणेन इन्द्रियेन च सम्बद्धविषयकं ज्ञानम् आत्मनि उत्पद्यते, तच्च अनारोपिवस्तुविषयकम्, अतस्तत्त्वज्ञानम्, एतेन संसारस्य उच्छेदो भवति। सामान्यतया सर्वदैव पूर्वानुभवजनितसंस्कारप्रभावितान्तःकरणेन इन्द्रियेण च सम्बद्धविषयकमेव ज्ञानम् आत्मनि जायते, अतस्तज्ज्ञानं न मोक्षहेतुः, किन्तु संसारबन्धनस्य पुष्टिरेव भवति तज्ज्ञानेन। प्रश्नोऽयम् उदेति—ज्ञानोत्पत्तिकाले अन्तःकरणम् इन्द्रियञ्च कथं पूर्वानुभवजनितसंस्कारैः वासनाख्यैः अप्रभावितं भवेत्? येन आत्मनि नियमेन तत्त्वज्ञानमेव जायते। उच्यते, एतदर्थं भिन्नभिन्नशास्त्रकारैः भिन्नः भिन्नः पन्थाः आविष्कृतः, तथाहि न्यायदर्शनस्य आचार्यैः एतदर्थं उद्देशलक्षणपरीक्षात्मको विधिः आविष्कृतः, वैशेषिकदर्शनस्य आचार्यैः साधर्म्यवैधर्म्य-ज्ञानात्मको विधिः विकसितः। उपायानां भिन्नत्वेऽपि न फलभेदः, फलन्तु ज्ञानोत्पत्तिकाले अन्तःकरणस्य इन्द्रियाणाञ्च वासनाराहित्यम्, फलस्वरूपम् अनारोपितविषयकं तत्त्वज्ञानमेव उदेति आत्मनि।[19] तस्मात् वक्तुं शक्यते यत् प्रशस्तपादवचने गौतमवचने च दृश्यमानायामपि भिन्नतायां न वास्तविको विरोधोऽस्ति। अतएव आचार्यश्रीधरः प्रशस्तपादवचनाभिप्रायं स्पष्टयति—

''साधर्म्यवैधर्म्य एव तत्त्वं साधर्म्यवैधर्म्यतत्त्वम्, तस्य ज्ञानं निःश्रेयसहेतुः।''[20]

वस्तुतः साधर्म्यवैधर्म्यज्ञानाख्यं तत्त्वज्ञानं मिथ्याज्ञानं निवर्तयत् मोक्षं प्रति हेतुतां भज इति न संशयस्य अवकाशः। परन्तु रागद्वेषादिदोषाणां विद्यमानतायां मिथ्याज्ञानं पुष्टमेव भवति, तस्मात् रागद्वेषादीनां निवृत्तिरपेक्ष्यते तत्त्वज्ञानोत्पत्तये। एतस्यां स्थितौ प्रश्नोऽयम् उदेति यत् किं रागद्वेषनिवृत्तये पदार्थसाधर्म्यवैधर्म्यज्ञानात् पृथक् साधनम् अपेक्ष्यते?

**3. साधर्म्यवैधर्म्यज्ञानादेव रागद्वेषनिवृत्तिः**—समाधानमिदमस्ति यत् पदार्थसाधर्म्यवैधर्म्यज्ञानादेव रागद्वेषादिदोषाणां निवृत्तिर्भवति, अथ च मिथ्याज्ञाननिवृत्ति-पूर्वकतत्त्वज्ञानोत्पत्तिरपि भवति। साधर्म्यवैधर्म्यज्ञानेन रागद्वेषनिवृत्तिप्रकारविज्ञानात् पूर्वम् इदं विचार्यते–कश्च रागः? कश्च द्वेषः? कथं च तयोरुत्पत्तिः वृद्धिश्च आत्मनि भवति? तथाहि रागं परिष्करोति आचार्यवात्स्यायनः–"आसक्तिलक्षणो रागः"[21] अर्थात् रूपरसादिविषये इन्द्रियाणां मनसश्च या स्वाभाविकी प्रवर्तना लिप्तता वा तद्रूपा आसक्तिरेव रागशब्दवाच्या। कामः, मत्सरः, स्पृहा, तृष्णा, लोभादयश्च सर्वे रागस्यैव विविधरूपाणि।

**(क) वस्तुनि रागोत्पत्तिप्रकारः**—कस्मिंश्चिद् विषये तन्निष्ठगुण-धर्माख्यकारणादेव प्राणिनां राग उपजायते। यथा यदि किमपि वस्तु चक्षुःसन्निकर्षकालीन-दर्शनवेलायां मधुरं प्रतीयते, तर्हि तत्र विद्यमानसौन्दर्यमेव प्रमुखं कारणमस्ति। यस्मात् सौन्दर्यम् अस्माकं कृते मधुरं प्रतीयते, तस्मात् सौन्दर्याश्रयीभूते वस्तुनि रागः निर्मीयते। इत्थञ्च रजतत्वधर्मविशिष्टं रजतं दृष्ट्वा तत्र लोभो भवति। एष लोभः रागस्यैव प्रकारविशेष एव। वस्तुतस्तु रजतत्वधर्मसम्बन्धात् रजतम् आदानप्रदानादि-व्यवहारे उपयोगितया मूल्यवद् भवति, ततश्च तस्मिन् रागः, स्पष्टमिदं यत् रजतत्वधर्माश्रयणादेव रजते रागस्य निर्मितिः। अतः कथयितुं शक्यते यत् रागद्वेषादीनां निर्मितौ वस्तुनिष्ठधर्माणामेव प्रामुख्येन योगदानमस्ति। यदा पदार्थानां साधर्म्यज्ञानम् आत्मनि उपजायते तदा रागस्य निवृत्तिर्भवति। धर्माद् वस्तुनि या प्रियताबुद्धिः आसीत्, तस्या निवृत्तिः साधर्म्यज्ञानाद् भवति। वस्तुतः धर्मादेव वस्तुनि भेदव्यवहारो भवति, भेदव्यवहारश्च रागहेतुः। तथाहि एकस्याः एव मृत्तिकायाः उपादानकारणाद् जायमाने घटे, शरावादौ च घटत्वं शरावत्वादिकं च धर्म अवभासते, ततश्च शरावे घटात् भेदव्यवहारः, फलञ्च घटादौ रागः। यदा



साधर्म्यज्ञानात् प्रतीयते यत् घटशरावादिषु एकमेव पृथिवीत्वं धर्मः, पृथिवीत्वाश्रयणाद् सर्वे घटादयः समाना एव। फलञ्च घटादौ रागनिवृत्तिः। अतः अवबुध्यते यत् पदार्थसाधर्म्यवैधर्म्याख्यतत्त्वज्ञानात् बन्धनहेतुभूतयोः रागद्वेषयोः निवृत्तिर्भवति, पश्चाच्च अपवर्गप्राप्तिः। उक्तं च वात्स्यायनेन–

**बन्धनसमाज्ञातो हि रागः। न च बन्धने सत्यपि कश्चिन्मुक्त इत्युपपद्यत इति।**[22]

**(ख) वस्तुनि द्वेषनिर्मितिप्रकारः**—यथा वस्तुनिष्ठो धर्म एव तस्मिन् रागनिर्मितौ हेतुः तथैव वस्तुनि द्वेषनिर्मितौ अपि तन्निष्ठधर्म एव हेतुतां भजते। तथाहि, यस्मात् अस्माकं दुःखानुभूतिर्जायते, तद्वस्तुविषयकद्वेषः अस्माकम् आत्मनि उपजायते। द्वेषं परिभाषते आचार्यः वात्स्यायनः–

"अमर्षलक्षणो द्वेषः"[23] अमर्षो नाम असहिष्णुता, तथा च दुःखस्य दुःखसाधनानां च या असहिष्णुता सा एव अमर्षः, द्वेष इति अपरपर्यायः। क्रोधः, ईर्ष्या, असूया, द्रोहः इत्यादिभावनापि द्वेषस्यैव विविधरूपः। यदा कस्माच्चित् पुरुषाद् अस्माकं दुःखानुभूतिर्भवति, तदा वयं तस्मात् पुरुषाद् दूरमेव स्थातुमिच्छामः। तत्साहचर्यं कदापि न वाञ्छामः, एतदेव द्वेषः। इत्थं च सदा कस्यचन मित्रस्य कृते मनसि ईर्ष्यायाः भाव उपजायते तदपि द्वेषस्यैव प्रकारविशेषः। तद् मित्रं प्रति अस्माकं मनसि प्रतिकूलतायाः अनुभूतिर्जायते, यद् अस्माकं दुःखानुभूतौ हेतुर्भवति, एतदेव ईर्ष्यायाः मूलम् इति। यदा अस्माकम् आत्मनि पदार्थानां साधर्म्यविषयकं ज्ञानमुपजायते, तदा सर्वेषु वस्तुषु व्यक्तिषु च समानरूपेण[24] विद्यमानस्य धर्मस्य ज्ञानात् द्वेषमूलमेव नश्यति ततश्च द्वेषनाशः। वस्तुतः भेदबुद्धिरेव रागहेतुः द्वेषहेतुश्च, साधर्म्यज्ञानेन भेदबुद्धिनाशात् न रागः न च द्वेषः।

न केवलं रागद्वेषौ एव संसारबन्धनपुष्टिकारकौ, किन्तु अपरोऽपि अस्ति कश्चन दोषो मोहाख्यः संसारबन्धनपुष्टिहेतुः।[25] मिथ्याज्ञानशब्देनापि मोहः कदाचित् आख्यायते। यथा वात्स्यायनः–"मिथ्याप्रतिपत्तिलक्षणो मोह इति।"[26] अर्थात् मिथ्याप्रतिपत्तिः मिथ्याज्ञानं वा मोहस्य लक्षणम्। इदमत्र अवधातव्यं यत् अत्र मिथ्याज्ञानशब्देन तत्त्वज्ञानाख्यं मिथ्याज्ञानं न ग्राह्यम्, अपि तु अविवेकज्ञानाख्यमेव मिथ्याज्ञानं मोहपदेन ग्राह्यम्। अतएव आह आचार्यः उद्योतकरः–"मोहः–

यथाऽवस्थितविषये अयथाभावप्रतिपत्तिर्या।''[27] वस्तुतः तत्त्वज्ञानेन मिथ्याज्ञानं निवर्त्यते अपवर्गश्च लभ्यते। मोहस्य निवृत्तिस्तु विवेकाऽभ्यासात् भवति। विवेकाऽभ्यासेन मोहनिवृत्तिः प्रथमं जायते, ततः तत्त्वज्ञानोदयः आत्मनि, फलञ्च मिथ्याज्ञानस्य निवृत्तिः। अतएव आचार्य उदयनः कथयति–''न चाऽपरोक्षविषयो मोहः औपदेशिकेनानुमानिकेन वा तत्त्वनिश्चयेन निराकर्तुं पार्यते, तदुपायानुष्ठानेन तु तयोरुपयोगः। तदर्थम् अभ्यास एव शरणम्।''[28]

अत्र अभ्यासपदेन विवेकाऽभ्यासो गृह्यते, तच्च पदार्थसाधर्म्यवैधर्म्यज्ञानपूर्वकं भवति। तथा च यस्मिन् स्त्रीपुत्रादौ विषये अविवेकाख्यो मोहः उपजायते, तस्मिन् विषये साधर्म्यवैधर्म्यज्ञानपूर्वकं विवेकज्ञानस्य पुनः पुनः अभ्यासः कर्त्तव्यः, ततश्च विवेकज्ञानोदये सति अविवेकज्ञानाख्यो मोहो निवर्त्यते, फलञ्च अन्तःकरणस्य निर्मलता, ततश्च आत्मशरीरादिपदार्थसाधर्म्यवैधर्म्याख्यतत्त्वज्ञानेन मिथ्याज्ञाननिवृत्तौ सत्याम् अपवर्गः सिद्ध्यति इति सिद्धम् साधर्म्यवैधर्म्यज्ञानस्य मोक्षहेतुत्वम्। तथा च यथार्थ- व्यवहारस्य सिद्धिः अथ च मोक्षाऽवाप्तिः साधर्म्यवैधर्म्यनिरूपणस्य फलम्।

## सन्दर्भाः


1. जयन्तभट्टः, न्यायमञ्जरी, तृतीयभागः, पृ.26, प्रथमसंस्करणम्, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयप्रकाशनम्, वाराणसी, 1984

2. ''प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः।'' महर्षि गौतम, न्यायसूत्र 1/1/ पृ.5 सम्पादक स्वामी द्वारिकादास शास्त्री, बौद्धभारती प्रकाशन, वाराणसी, अभिनवसंस्करण, 1999

3. श्रीविश्वनाथपंचाननभट्टाचार्यः, न्यायसिद्धान्तमुक्तावली, प्रत्यक्षखण्डम्, पृ.44, सम्पादकः श्रीरामगोविन्दशुक्लः, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, संस्करणम् 16, 2008

4. ''अत्र च समवेतसमवेतवृत्तिपदार्थविभाजकोपाधिमत्त्वम् द्रव्यादिचतुर्णां साधर्म्यं बोध्यम्।'' दिनकरभट्टाचार्यः, दिनकरी, पृ.171-174, चौखम्बा संस्कृत प्रतिष्ठानम्, दिल्ली, पुनर्मुद्रितसंस्करणम्, 1988





5. ''वस्तुतस्तु समवायसम्बन्धावच्छिन्नप्रतियोगिताकसामान्याभावस्य साधर्म्यत्वे न कोऽपि दोष इति ध्येयम्।'' रामरुद्रभट्टाचार्यः, रामरुद्री, पृ.178, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, पुनर्मुद्रितसंस्करण, 1988

6. ''द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानां साधर्म्यवैधर्म्यतत्त्वज्ञानं निःश्रेयसहेतुः।'' आचार्यप्रशस्तपादः, पदार्थधर्मसंग्रहः, पृ.15, सम्पूर्णानन्दसंस्कृत विश्वविद्यालयप्रकाशनम्, वाराणसी, द्वितीयसंस्करणम्, 1997

7. ''यस्य वस्तुनो यो भावस्तत् तस्य तत्त्वम्। साधारणो धर्मः साधर्म्यम्, असाधारणो धर्मो वैधर्म्यम्। साधर्म्यवैधर्म्य एव तत्त्वं साधर्म्यवैधर्म्यतत्त्वम्।'' श्रीधरभट्टः, न्यायकन्दली, पृ.16 सम्पूर्णानन्दसंस्कृत-विश्वविद्यालय-प्रकाशनम्, वाराणसी, द्वितीयसंस्करणम्, 1997

8. ''व्यावृत्तत्वेन पदार्थज्ञानं तत्त्वज्ञानम्, तच्च वैधर्म्याधीनम्'' वल्लभाचार्यः, न्यायलीलावती, पृ.732, चौखम्बा-संस्कृतसीरीज-आफिस, द्वितीयं संस्करणम्, वाराणसी,1991

9. ''इच्छा द्रव्याश्रिता गुणत्वादिति चतुर्विंशतिगुणानां गुणत्वं साधर्म्यमात्मसाधकम्, एवं वाक्यगतं वाक्यत्वं साधर्म्यं वेदपौरुषेयत्वसाधकम्, कार्यत्वं च क्षित्यादिस-कर्तृकत्वसाधकम्।'' श्रीशंकरमिश्रः, न्यायलीलावतीकण्ठाभरणम्, पृ.778 चौखम्बा-संस्कृत सीरीज आफिस, द्वितीयसंस्करणम्, वाराणसी, 1991

10. ''आश्रितत्वमाधेयता स्वाभाविकी। सा च नित्यद्रव्येषु नास्तीत्यत आह अन्यत्रेति। नित्यद्रव्याणि विहायेदं साधर्म्यमित्यर्थः। अथ समवायाद् वैधर्म्यमितरेषां साधर्म्यमाह द्रव्यादीनामिति।'' श्रीउदयनाचार्यः, किरणावली, पृ.230-236, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय-प्रकाशनम्, प्रथमसंस्करणम्, वाराणसी, 1980

11. ''साधर्म्यविपर्ययोऽप्यन्यस्मात् साधर्म्यमित्यत्र वैधर्म्यश्चेत्यपि द्रष्टव्यम्।'' आचार्य- वर्धमानोपाध्यायः, किरणावलीप्रकाशः, पृ.182, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय-प्रकाशनम्, प्रथमसंस्करणम्, वाराणसी, 1933

12. अन्नम्भट्टः, तर्कसंग्रहः, प्रत्यक्षखण्डः, पृ.27, सम्पादकः श्रीशेषराजशर्मा रेग्मी, चौखम्बा-विद्याभवनम्, वाराणसी, चतुर्थसंस्करणम्, 1980

13. कठोपनिषत्, 1/3/14 पुनर्मुद्रितं सप्तमसंस्करणम्, गीताप्रेस, गोरखपुर,2010

14. पदार्थधर्मसंग्रहः, पृ.15

15. न्यायसूत्रम् 1/1/1 पृ.5

16. वैशेषिकसूत्रम् 1/1

17. न्यायकन्दली, पृ.18

18. किरणावली, पृ.45

19. ''पदार्थव्युत्पादनाय प्रवृत्तस्य शास्त्रस्य उभयथा प्रवृत्तिः उद्देशो लक्षणञ्च परीक्षायास्त्वनियमः। यत्राभिहिते लक्षणे प्रवादान्तरव्याक्षेपात्तत्त्वनिश्चयो न भवति, तत्र परपक्षव्युदासार्थं परीक्षाविधिरधिक्रियते। यत्र तु लक्षणाभिधानसामर्थ्यादेव तत्त्वनिश्चयः स्यात् तत्रायं व्यार्थो नार्थ्यते। योऽपि हि त्रिविधां शास्त्रस्य प्रवृत्तिमिच्छति, तस्यापि प्रयोजनादीनां नास्ति परीक्षा, तत् कस्य हेतोः ?• लक्षणमात्रादेव ते प्रतीयन्ते इति''। आचार्यश्रीधरः, न्यायकन्दली, पृ.68

20. न्यायकन्दली, पृ.16

21. आचार्यवात्स्यायनः, न्यायसूत्रभाष्यम् 4/1/3, पृ.222 सम्पादकः स्वामी द्वारिकादास शास्त्री, बौद्धभारती प्रकाशनम्, वाराणसी, अभिनवसंस्करणम्, 1999

22. वात्स्यायनभाष्यम् 1/1/22, पृ.32

23. वात्स्यायनभाष्यम्, 4/1/3, पृ.222

24. ''साधारणो धर्मः साधर्म्यम्'' न्यायकन्दली, पृ.16

25. ''तत्त्रैराश्यं रागद्वेषमोहार्थान्तरभावात्'' न्यायसूत्रम् 4/1/3, पृ.222

26. वात्स्यायनभाष्यम् 4/1/3, पृ.222

27. आचार्य उद्योत्करः, न्यायवार्तिकम् 4/1/3 सम्पादकः श्री विन्ध्येश्वरीप्रसाद द्विवेदी, चौखम्बासंस्कृतभवनम्, वाराणसी, पुनर्मुद्रितप्रथमसंस्करणम्, 2007

28. आचार्य उदयनः, न्यायवार्तिकतात्पर्यपरिशुद्धिः, पृ.104, सम्पादकः श्रीअनन्तलालठाकुरः, भारतीय-दार्शनिक-अनुसन्धान-परिषद्, नई दिल्ली, प्रथम-संस्करणम्,1996

❖



## फार्म - ४

**नियमः ८ द्रष्टव्यः**

| | | | |
|---|---|---|---|
| 1. | प्रकाशनस्थानम् | : | आरा (विहारः) |
| 2. | प्रकाशनस्य अवधिः | : | अर्धवार्षिकम् |
| 3. | मुद्रकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः ? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, आरा |
| 4. | प्रकाशकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः ? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |
| 5. | सम्पादकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः ? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |
| 6. | तेषां जनानां नामानि सङ्केताश्च ये समाचारपत्रस्य स्वामिनः स्युः तथा च ये समस्तव्ययस्य एकप्रतिशतात् अधिकस्य अंशग्राहकाः स्युः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |

अहं गोपबन्धु मिश्रः एतद्द्वारा उद्घोषयामि यत् मम अधिकतमस्य बोधस्य विश्वासस्य च अनुसारेण उपरि प्रदत्तं विवरणं सत्यम् अस्ति।

**ह. गोपबन्धु मिश्रः**
सम्पादकः